But the Vedic hymns appear to be manifold in their theme, and diverse in their interest; many are the devatās that are eulogized, and numerous are the benefits sought. The standpoint that we are considering now not only makes a distinction (which is universally accepted) between the meanings that are only conventionally valid (rūḍhi) and the meanings that are arrived at after etymological and syntactical considerations (yoga), but makes a further distinction in the latter between ordinary (yoga) and extraordinary (mahāyoga) senses. The meaning drawn from etymological, syntactical and contextual considerations ('yogo nāma avayava-śaktyārtha-pratyāyakatvam') is more authentic and has greater validity than the meaning which is purely conventional. Likewise, the meaning that is based on traditionally accepted implications and scriptural suggestions is even more authentic, and has much greater vaidity. If the ascertainment of the inherent import or purport based on etymological and other considerations based on yoga is called 'tātparya', the ascertainment of the import based on the principles of mahāyoga is

CC0. In Public Domain. Digitized by Muthulakshmi Academy

called 'mahātātparya' or the ultimate purport of absolute validity.

It is to be noted that Ānanda-tīrtha and his followers recognize a Nirukta prepared by Bādarāyaṇa (viz., Vyāsa) as ancient and valid, the Nirukta by Yāska being more recent (arvāchīna) and hence less trustworthy. This ancient Nirukta is not available to us now as an independent book; but etymological explanations and syntactical prescriptions from this source may be gleaned from the works of Ānanda-tīrtha and his followers.

The problem of the plurality of the devatās mentioned in the mantras and the great divergance of purposes indicated explicitly in them has been solved by the adherents of this viewpoint by pointing out that it is the great import or the ultimate purport (mahā-tātparya) of all the mantras together is what one must aim to arrive at. The Vedic texts are not to be understand by the conventional sense of words and apparent meanings as in ordinary lingual transaction ('na āpāta-pratīta eva śrutyarthaḥ'), but must be determined by the employment of the well-accepted canons of analytical reasoning and investigation known as Mīmāmsā ('kim tu mīmāmsita eva'). And these canons include the examination of how the text begins and ends, what the thrust is, what idea gets repeated frequently, what is novel in the statement, what the desired import or purpose is, and what the nature of descriptions and explanations is. The purport that is ascertained must

CC0. In Public Domain. Digitized by Muthulakshmi Academy

be in consonance with the general Vedic import, and must be meaningful in the context. Rāghavendra-tīrtha explains:

मीमांसा च उपक्रमोपसंहाराभ्यासापूर्वताफलार्थवादोपपत्तीनां श्रुतिलिङ्गप्रकरणस्थानसमाख्यानां च आनुगुण्यानुसन्धानम्।



That is to say, the purport of the Vedic passages needs to be reconstructed, for the words there do not have meanings that would be valid in normal speech. The Vedic idiom does not fit into the transactional framework. To enable the reconstruction of the meaning of the mantras, the words employed in them must be taken in senses which are altogether different. A word has many meanings, and the meaning that is most appropriate to the context must be chosen. The argument that when we take the words in different meanings, the intended import too will be different is not sustainable. It is not the word itself that is important, but the sense in which it is used, the function it discharges in the sentence, and the particular purpose that is sought to be served. This is technically called 'vṛtti'.

The expression 'agni' in a mantra does not mean the physical fire, as it does in conventional language; on the other hand, it refers to the deity or divinity presiding over the functions of the physical

CC0. In Public Domain. Digitized by Muthulakshmi Academy

fire. This is why Agni is eulogized and sought to be placated. The word 'agni' used in the mantra refers to the devatā of that name in a primary sense (mukhya-vṛtti); the etymological, syntactical and contextual considerations become important. The mīmāmsā does not stop here. The word 'Agni' in the mantra may not refer really to the devatā, but to the Great Spirit (viz. Vishṇu), who is the inner ruler of this devatā. The devatās like Agni, Indra and so on are only so many different articulations of the one spirit (eka ātmā); they are in the nature of so many limbs of the Great Spirit (angāvabaddha). Looking upon the expression 'agni' in a mantra as referring to the One Great Spirit is known as 'parama-mukhya-vṛtti' (the most fundamental sense)

Two of the three meanings (trayorthāh) that the Vedic passage is said to have answer to the 'mukhya-vrtti' (gods like Agni) and the 'parama-mukhya-vṛtti' (Vishṇu as inherent in Agni) of the significant words.

A question may then be posed: if all the Vedic mantras ultimately refer to Vishṇu, why should there be hymns to Agni, hymns to Indra, hymns to Vāyu and so on? The very arrangement of the Vedic corpus (in the avāntara-śākhā-veda recension) in terms of devatā-specific sūktas would then become redundant and inappropriate. The answer would be that the hymns to Agni, Indra, Vāyu etc. are not irrelevant or uncalled for, because convention does have a role to play. And the arrangement of the Vedic corpus into sūktas are

CC0. In Public Domain. Digitized by Muthulakshmi Academy

not by any means rejected. The differentiation of devatās (into Agni, Indra, Vāyu, etc.) is indeed accepted, because it is through these several forms and names that worship in practice is conducted. Each of the devatās is said to have a specific benefit to proffer. Ānandatīrtha in his *Anuvyākhyāna* (on 1,4,11 'kalpanopadeśāt') has this to say:

तेषु तेषु पदार्थेषु रूढिरङ्गीकृता यतः।
प्रयोजनबहुत्वेन तस्य तस्याविरोधतः।
उपदेशादिसामर्थ्याद्विष्णौ शक्तिश्च गृह्यते॥



The individual gods are not irrelevant, for at the first level of interpretation it is on these gods that our attention is focussed. For the same reason, the arrangement of the ṛks in sūktas also is proper. But it must be recognized that these devatās can be explained only on the basis of 'mukhya-vṛtti', and that they lose their independence and importance, when viewed from the angle of 'parama-mukhya-vṛtti'. Then, it is only Vishṇu (as the Supreme Spirit) that becomes the purport of all the sūktas without an exception. The differences between the devatās at the mukhya-vṛtti level cannot therefore be construed as at cross-purposes or thematic divergance in the sūktas. Interpretation must of course begin with the individual devatās, but

CC0. In Public Domain. Digitized by Muthulakshmi Academy

culminate in the recognition of the one Supreme Spirit. The individual devatās become pertinent because devotees visualize these devatās, and organize their own spiritual practices (upāsanā, like bowing, worshipping, meditating etc. 'namana-pūjana-mananādayah') on the basis of these devatās. These individual devatās serve as efficient footholds (adhishṭhāna) for the Supreme Spirit. The presence of the Supreme Spirit must be recognized only by such instrumentality (anusmartavyah). And the Supreme Spirit will manifest itself in these footholds, when worshipped; while the individual gods are not themselves ultimate, they serve to facilitate the manifestation of the Supreme Spirit (abhivyajyamānatva). It is also possible that the devotees will realize Godhead only through these chosen devatās (prāpyatva). The viewpoint illustrated above holds that the entire Vedic corpus has only Vishṇu (the one Supreme Spirit) as its most primary purport; and that this knowledge is meant to serve only the purpose of emanicipation and nothing else:

सर्वे वेदाः विष्णुज्ञानजनकाः ।
तत्साध्यमोक्षार्थं प्रवृत्तत्वात् ॥

This outlook concedes that conventional meaning (rūḍhi) is not to be dispensed with altogether. It does have its role; but the real purport of the Vedas is to be ascertained by the method of reconstruction (yoga), without falling into the error of multiplicity of imports and plurality of devatās occasioned by conventional understanding.

CC0. In Public Domain. Digitized by Muthulakshmi Academy

रूढिमेव समाश्रित्य विभज्यार्थान् यथाक्रमम्।
विदोषगुणपूर्त्यर्थं विष्णौ योगार्थमानयेत्॥ .

---

(4)

Another of the presuppositions here is that the Vedic corpus is merely an extended articulation of the three primordial and sacred syllables (vyāhṛtis): bhūh, bhuvah and svah (or suvah), which in turn are evolutes of the three ingredients (a,u,and ma) of the mystic syllable Om (praṇava). The Om signifies the Supreme Spirit, full of all auspicious attributes and free from all imperfections, inadequacies and improprieties. In Jayatīrtha's words:

सकलवेदानां मुख्यतो भगवत्प्रतिपत्तिहेतुत्वात्।
कुतः एतद्? इत्यत आह ओमिति। असौ परमेश्वरः
ओंकारार्थस्तावत्। केन निमित्तेन?
अशेषगुणाधार इति।
इतिशब्दो हेतौ। यथोक्तं, ओतत्त्ववाची
ह्योंकारः इति॥

In fact, all sound is in the ultimate analysis designation of the Supreme Spirit. In this, the ideology of mantra-śāstra is accepted: nāda as a sound-unit brings into existence 'bindu': and from 'bindu' proceeds 'kalā'. (also called ghosha). *Bṛhat-samhitā* is cited where not only Om but even meaningless sound-forms like the thunder, sea-roar, bell-pealing, drum-beat or bull-roar suggest only the presence of the Spirit, even as the sound of breathing, and the articulations and modulations of our speech; they

CC0. In Public Domain. Digitized by Muthulakshmi Academy

denote power, power to overcome and transcend:

हुंकारेण सदैवाब्धिः सर्वाभिभवशक्तताम्।
विष्णोर्वक्ति यतो हुं हि पराभिभववाचकः॥
ओमिति स्वरतो नित्यं वायुर्मेघेषु संस्थितः।
बलवन्नादसंयुक्तो ह्यधिकोच्चत्वमस्य तु॥
ओंकारस्यार्थ उद्दिष्टः उक्तार्थाधिक्यमेव च।
नादो बली प्रवदति तथा भेरी ध्वनिः प्रभोः॥
अनुदात्तस्वरूपतादौदार्यं वदतीशतुः।
तदपेक्षया ह्यनीचत्वं घण्टायाः स्वरितात्मतः॥
उच्चस्थितिमुदात्तस्तु स्वर्णचश्चादिकः स्वरः।
विष्णोर्वक्ति तथा मन्द्रः श्वासादि प्रथनात्मकः।
एकप्रकारतां विष्णोः सदाऽचल्यां वदत्यपि॥



The Omkāra or praṇava is regarded as a mantra in its own right, with eight syllables (varṇas or aksharas), each representing or symbolizing a specific form of the Supreme Spirit (Viśva etc): (1) a-kāra, (2) u-kāra, (3) ma-kāra, (4) nāda, (5) bindu, (6) ghosha, (7) śānta, and (8) ati-śānta ('akārādy ati-śāntāntah praṇavoshṭāksharo matah', *Tantra-sāra-vyakhyā).* The eight ingredients of praṇava are also identified with the waking state (viśva), the dream state (taijasa), the sleep state (prājña), the state beyond these three (turīya or the fourth state), the self (ātmā), the inner self (antar-ātmā), the supreme self (paramātmā) and the self as pure and highest consciousness (jñānātmā). The first three ingredients are important inasmuch as they engender the vyāhṛtis in their isolation (vyasta) and combination (samasta). From a-kāra proceeds 'bhūh' (representing this earth, the pṛthvī-sthāna); from u-kāra proceeds 'bhuvah' (the mid-

CC0. In Public Domain. Digitized by Muthulakshmi Academy

region, the antariksha-sthāna) and from ma-kāra 'svah'or 'suvah' (the celestial realm or the dyus-sthāna).



And from the three vyāhṛtis are articulated the three pādas of the sacred mantra Gāyatri: from bhūh, 'tat savitur vareṇyam', from bhuvah, 'bhargo devasya dhīmahi', and from svah (or suvah) 'dhiyo yo nah prachodayāt'. The purport of the Gayatrī-mantra is to explicate the significance hidden in the three vyāhṛtis, and the three vyāhṛtis are



themselves the explication of the purport of 'Om'. The Gāyatrī-mantra is expanded in its purport in the form of Purusha-sūkta; and Purusha-sūkta is the epitome of the entire Vedic corpus, especially of the *Ṛgveda-samhitā.* Ānanda-tīrtha says:

ओमशेषगुणाधार इति नारायणोऽप्यसौ।
पूर्णोभूतिवरोऽनन्तसुखो यद्व्याहृतीरितः॥
गुणैस्ततः प्रसविता वरणीयो गुणोन्नतेः।
भा-रति ज्ञानरूपत्वाद् भर्गो ध्येयोऽखिलैर्जनैः॥
प्रेरकोऽशेषबुद्धीनां स गायत्र्यर्थ ईरितः।
स पूर्णत्वात्पुमान्नाम पौरुषे सूक्त ईरितः॥
एवाखिलवेदार्थः सर्वशास्त्रार्थ एव च।
स एव सर्वशब्दार्थः इत्याहोपनिषत् परा॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy



ता वा एता ऋचइति विशेषेणाप्यृगर्थताम्।
यो देवानामिति श्रुत्या देवनाम्यां विशेषतः॥
(यो देवानां नामधा एक एव।)

The chief purport of Omkāra, the Vyāhṛtis, the Gāyatrī-mantra, the Purusha-sūkta and the *Ṛgveda-saṁhitā* is alike the one Supreme Spirit (called here Vishṇu or Nārāyaṇa). They are all meant to extol the supremacy only of this Godhead, bringing out the adorable and auspicious traits in their entirety. These sacred texts are like commentaries (vyākhyāna) which are meant to unravel the mystic profundity of the one Supreme Spirit (who is like the vyākhyeya, or the theme of the commentaries).

The ādhyātma interpretation here, which is the explication of the meaning at the third level, is in essence the same as described in the previous chapter. It relates to the individul's own physical and mental constitution with the Supreme Spirit as the presiding devatā (the bimba or antaryāmi). Words apparently referring to rituals or physical objects are here taken in the symbolic sense as intended to draw attention to the sense-functions and mental processes. When the devatās are mentioned, they mean in reality the devatās presiding over our own constitutional details (tattva-devatās). This will be illustrated when individual mantras are taken up for explanation.

The adhyātma approach here is identified as 'jñāna-yajña' (symbolic ritual), as distinguished from 'bāhya-yajña' (external or physical ritual), which is adhi-yajña. The former is more important than the latter:

बाह्ययज्ञे अमुख्यत्वेन अग्नेर्बाह्ययज्ञे तदन्तर्गतस्य हरेरध्यात्मं च ज्ञानयज्ञे हरेर्मुख्यत्वेनेति विवेकः ॥

(Śrinivāsa-tīrtha's *Tippaṇa*)

CC0. In Public Domain. Digitized by Muthulakshmi Academy

Given below are excerpts from the introductory portions of Ānanda-tīrtha's *Ṛgbhāshya* (in bold characters) along with the gloss of Jaya-tīrtha (in light characters) and notes by Śrīnivasa-tīrtha (within brackets). This section is followed by the preface appended by Rāghavendra-tīrtha to his annotation called *Mantrārtha-mañjarī*.



(१)

**(आ) नारायणं निखिलपूर्णगुणार्ण-**
**मुच्चसूर्यामितद्युतिमशेषनिरस्तदोषम्।**
**सर्वेश्वरं गुरुमजेशनुतं प्रणम्य**
**वक्ष्याम्यृगर्थमतितुष्टिकरं तदस्य ॥१॥**

(ज) निखिलाः निःशेषाः। पूर्णाः प्रत्येकम्। ते च ते गुणाश्च। अर्ण इत्युदकनाम। निखिलपूर्णगुणैः अर्णः समुद्र इव ।

(श्री) (पूर्णा अपरिच्छिन्नाः प्रत्येकं निवधिका इत्यर्थः। सकारान्तो अर्णः शब्दः। अर्णस् शब्दात् अर्णांसि विद्यन्तेऽस्मिन्निति।)

CC0. In Public Domain. Digitized by Muthulakshmi Academy

(ज) के ते गुणाः इत्यतो लेशेन दर्शयति - उच्चेति। अमिताश्च ते सूर्याश्च सुर्यामिताः। उच्चाः सामस्त्येन आविर्भूतप्रकाशाश्च ते सूर्यामिताश्च। तेषां द्युतिरिव द्युतिर्यस्यासौ तथोक्तः। यद्वा उच्चास्ते सूर्याश्च तैः अमिता अपरिच्छिन्ना द्युतिर्यस्येति व्याख्येयम्।

(श्री) (सूर्यस्योच्चत्वं नाम मेषाद्युच्चराशिस्थितत्वम्। सामस्त्येनेति। तेन संशमनं चास्य विश्वकर्मा चकार ह। भूमिमारोप्य सूर्यं तु तस्य तेजो विनाशनम्। सूर्यस्य सामस्त्येनाविर्भूतप्रकाशत्वाभावो दृष्टव्यः॥ तैः मिताः परिमिताः न भवन्तीत्यर्थः। अपरिच्छिन्ना इत्यर्थः। सूर्यादिद्युतेः परिच्छिन्नत्वादिति भावः।)

(ज) अशेषेण निरस्ता दोषाः यस्मात् सः अशेषनिरस्तदोषः। तम्।

(श्री) (अशेषेण साकल्येनेत्यर्थः। तथा च नाशेषत्वं दोषाणां विशेषणम्।)

(ज) सर्वेश्वरम्। अस्वतन्त्रस्य प्रपञ्चस्येश्वरेण भाव्यमिति प्रसिद्धमेव।

(श्री) (प्रपञ्चस्य सत्ताप्रतीत्यादस्वतन्त्रतया तन्नियामकेन भाव्यम्। अन्यथा नित्यसुखप्रसङ्गात्।)

(ज) ऋक्प्रतिपाद्यतया नतं गुरुत्वेनापि नमति। तदुपपादयति। अजेति। ऋगर्थं वक्ष्यामीत्यनेन सन्निधापितमृगर्थस्य वचनं श्रवणं ज्ञानं च तदिति परामृशति। यस्मात्तदृगर्थवचनादिकमस्य नारायणस्य अतितुष्टिकरं तस्मात्।

(निर्दोषवेदप्रतिपाद्यत्वार्थक नारायणपदप्रयोगेनैव ऋक्प्रतिपाद्यत्वलाभात् इति भावः। प्राधान्यतो ऋगर्थवचनमेव सन्निधापितम्। ऋगर्थवचनस्य ज्ञानपूर्वकत्वात्। ... ऋगर्थस्य चेदं विशेषणं तस्य नारायणस्य तुष्टिकरत्व वचनादिद्वारा मन्तव्यम्।

सर्वोत्कर्षे देवदेवस्य विष्णोर्महातात्पर्यं
नैव चान्यत्र सत्यम्।
तत्प्रीणनान्मोक्षमाप्नेति सर्वस्ततो
वेदास्तत्पराः सर्व एव ॥

इति श्रुतेः इति भावः॥

(आ) ओमशेषगुणाधार इति नारायणोऽप्यसौ।
पूर्णो भूतिवरोऽनन्तसुखो यद् व्याहृतीरितः ॥२॥
गुणैस्ततः प्रसविता वरणीयो गुणोन्नतेः ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

भा-रति-ज्ञान रूपत्वाद् भर्गो ध्येयोऽखिलैर्जनैः।
प्रेरकोऽशेषबुद्धीनां स गायत्र्यर्थ ईरितः ॥३॥

(ज) सकलवेदानां मुख्यतो भगवत्प्रतिपत्तिहेतुत्वात्। कुत एतदित्याह। ओमिति। असौ परमेश्वरः। ॐकारार्थस्तावत्। केनं मिमित्तेन? अशेषगुणाधार इति। इतिशब्दो हैतौ। यथोक्तं 'ओतत्ववाची ह्योङ्कार' इति। कुत इत्यतश्चोक्तमशेषेति। ओंकारो ह्यशेषगुणाधारत्वं वक्ति। तथाभूतश्च परमेश्वर एवेति स ओंकारार्थः। किञ्च नारायणशब्दो हि भगवति प्रसिद्धः। स च गुणपूर्तिवाची। तत्समाख्यानादोङ्कारोऽपि तत्पर इति निश्चीयत इत्याह। नारायणोऽप्यसौ इति। किमतो यद्येवम् इत्यत आह - पूर्ण इति। यद्यस्मादेवमोङ्कारः तस्माद् व्याहृतीरितः स एव 'प्रणवार्था व्याहृतयः' इति वचनात्॥

(श्री) (गुणपूर्तिवाची। अरा दोषाः। तद्विरुद्धा गुणाः नाराः। तदाश्रयेति व्युत्पत्त्या इत्यर्थः। गुणपूर्णस्वरूपप्रवृत्तिनिमित्तक नारायणशब्दस्य भगवत्परत्वे सिद्धे तत्समाख्यानात् गुणपूर्णरूपप्रवृत्तिनिमित्तक ओंङ्कारोऽपि भगवत्पर इति निश्चीयत इत्यर्थः। किमतो यद्येवमिति। भगवतः ओंङ्कार प्रतिपाद्यत्वेऽपि सर्ववेदप्रतिपाद्यत्वं कुतः? न ह्योङ्कार एव वेदाः इत्यर्थः? तथा चोक्तानुमाने अप्रयोजकता इति भावः।

'प्रणवार्था व्याहृतयो व्याहृत्यर्था ऋगादयः।' इत्यागमेन तिसृणां व्याहृतीनां वर्णत्रयात्मकओङ्कारव्याख्यान रूपताऽवगमेन व्याख्यान व्याख्येययोः एकार्थत्वादिति भावः।)

(ज) किं निमित्तम्? यस्मात्पूर्णो भूतिवरोऽनन्तसुखश्च तस्माद्व्याहृतीरितः। 'भू बहौ बहुः पूर्णतायां' इत्युक्तत्वाद् भवतेः क्विपि पूर्णत्वाद् भूः॥ भूत्यैश्वर्येण वरो महैश्वर्यवान् इति भुवः॥ ... सु शोभनं वः सुखं यस्य शोभनता च सुखस्यानन्ततया इत्यनन्तसुखत्वात् सुवः॥ स्वरिति पक्षे निरुक्तत्वादुकारलोपः। शब्दस्वाभाव्यादव्ययत्वम्॥

(श्री) (बहुरिति। भवतेः क्विबिति। पूर्णत्वरूपबहुत्वार्थकस्य भूधातोः क्विप्प्रत्यये तस्य सर्वस्यापि लोपे भूरित्येवं रूपं द्रष्टव्यम्। पूर्णत्वस्यैव ऐश्वर्यरूपत्वात् इत्यर्थः। भूधातोर्भावे औणादिके डुप्रत्यये डकारलोपे डितिपरे टिभूतस्य डकारस्य लोपे भू उ भू इति रूपम्। अन्तलोप इति। रकारस्थस्याकारलापेत्यर्थः। तथा च भुवरू इति जाते विसर्गे च सति भुव इति रूपम्। निरुक्तत्वादन्तलोपः॥ स्वरिति ऋग्वेदिनां पाठः। तथा च सु इत्यत्रत्योकाररूपवर्णस्य नाशे स् वः स्वरिति रूपम्॥ अत्र शब्दस्वाभाव्यात् अव्ययत्वे प्रकृतिप्रत्ययन्युत्पादनं कस्मात् कृतमिति न विचार्यम्॥)

CC0. In Public Domain. Digitized by Muthulakshmi Academy



(ज) यस्माद् व्याहृतीरितः तस्मात् स एव गायत्र्यर्थ ईरितः। व्याहृत्यर्थत्वाद् गायत्र्याः। केन निमित्तेन? 'गुणैस्तत' इति। योग्यतया गुणानां सम्बन्धः प्रसविता जगतो जनक इति सविता। षूञ् प्राणिप्रसव इत्यस्मात् तृच्। वरणीयो भजनीय इति वरेण्यः। वृञ् एण्य इति वृणोतेः कर्मण्येण्यः। गुणोन्नतेर्हेतोः वरणीय इति॥ तद्वरेण्यशब्दार्थयोः हेतुहेतुमद्भावो दर्शितः॥ भा दीप्तिः। रतिः क्रीडा। गत्यर्थानां ज्ञानार्थत्वाद् गमे र्ज्ञानार्थता। भा दीप्तौ, रमु क्रीडायां, गम्लृ गतौ धातुसमुदायादसुन्। ... । असुन् प्रत्ययसंयोगेन भातेः ह्रस्वता। रमेर्गमेश्च टिलोपः॥

(श्री) (भगवतो व्याहृतिप्रतिपाद्यत्वेऽपि सर्ववेदप्रतिपाद्यत्वे किमायातम्? न हि व्याहृतय एव वेदा इत्यर्थः। व्याहृत्यर्थत्वात् इति। व्याहृतित्रिगुणा पुनः वेदमाता तु गायत्रीति त्रिपदगायत्र्याः व्याहृति त्रयव्याख्यानरूपताऽवगमात्॥ .... ॥ तनु विस्तारे इत्यस्मात् डप्रत्यये डकारलोपे टिभूतस्यानु इत्यस्य लोपे त् अत् तत् इति रूपम्॥ 'षूञ् प्राणिप्रसवे' अत्र ञकारोऽनुबन्धार्थः। एवं उत्तरत्रापि ॥ ... तथा च 'वृञ् वरणे' इत्यस्मात् व्रियते इति कर्मणि एण्य प्रत्यये सार्वधातुकेत्यनेन ऋकारस्य गुणे तस्य रपरत्वे वरू एण्य वरेण्य इति रूपम्॥ तत् वरेण्यशब्दार्थयोः इति। तच्छब्दार्थ वरेण्यशब्दार्थयोः इत्यर्थः॥)

(ज) देवशब्दस्तु उत्तरत्र व्याख्यास्यते। धीमहीत्यस्य तात्पर्यं ध्येय इति। ध्यायतेः संप्रसारणं विकरणलोप आत्मनेपदं च च्छान्दसम्। 'व्यत्ययो बहुलम्' इति वचनात्। अखिलैर्जनैः इति बहुवचनार्थः॥ तृतीयपदतात्पर्यं प्रेरक इति॥ नः इति बहुवचनप्रयोगादशेषेत्युक्तम्। चुद प्रेरणे इत्यस्माल्लेट्॥ एवं योजनीयम्। यो नः अस्माकं अशेषजीवानां धियो बुद्धीः प्रचोदयात् प्रेरयेत् तस्य सवितुर्देवस्य नारायणस्य तद्गुणैः ततम्। तस्मादेव वरेण्यं भर्गः रूपं धीमहि चिन्तयाम इति॥

(श्री) (संप्रसारणमिति इक्स्थाने यण् भवतीति प्रसिद्धम् । तत्र यणां चेदिको भवन्ति तर्हि तत् संप्रसारणमित्युच्यते। 'इग्यणः संप्रसारणम्' इति सूत्रात्। शब् विकरणलोपः। विकरणप्रत्ययः। तथा च परतोऽचोऽभावान्न यादेश इति भावः॥ तथा च 'ध्यै चिन्तायाम्' अस्मादात्मनेपदिनि उत्तमपुरुषबहुवचने महिङ्प्रत्यये ङकारलोपे 'आदे च उपदेशे शिति' इत्यनेन ऐकारस्यैव आत्वे ध्या महीति जाते यकार इकाररूपे संप्रसारणे धि आ महीति जाते 'सम्प्रसारणाच्च' इत्यनेन आकारस्य पूर्वस्य इकारस्येव रूपे धि महीति जाते 'हलश्च' इति संप्रसारणस्य दीर्घे धीमहि इति रूपं द्रष्टव्यम्॥ ... धीमहीति बहुवचनार्थ इत्यर्थः।)

CC0. In Public Domain. Digitized by Muthulakshmi Academy



(आ) स पूर्णत्वात् पुमान्नाम पौरुषे सूक्त ईरितः ।
स एवाखिलवेदार्थः सर्वशास्त्रार्थ एव च ॥४॥

(ज) गायत्र्यर्थत्वेऽपि भगवतः किमायातं प्रकृते अत आह॥ स इति॥ यतो गायत्र्यर्थः तस्मात् स हरिरेव पौरुषे सूक्त ईरितः प्रतिपादितः। गायत्र्यर्थत्वात् तस्य। (प्रकृत इति। भगवतः सर्ववेदप्रतिपाद्यत्वे। न हि गायत्र्येव वेद इति भावः। गायत्र्यर्थत्वात्तस्य। 'तद् भेदः पौरुषं सूक्तं' इत्यागमे पुरुषसूक्तस्य वेदमाता तु गायत्रीति पूर्वप्रकृतगायत्री व्याख्यानरूपत्वापरपर्यायस्य तद् भेदस्योक्तत्वात्। व्याख्यानव्याख्येययोश्च एकार्थत्वादिति भावः॥)

न च पुरुषसूक्ते पुरुषः प्रतिपाद्यो न विष्णुरिति वाच्यम्। यतः पूर्णत्वात् पुमान् पुरुषो नाम एव स एव। 'पॄ पालनपूरणयोः' अस्मात् 'पुरः कुषन्' इति कुषन्प्रत्ययः। तथापि किमित्यत आह॥ स एवेति॥ यतः पुरुषसूक्तार्थो भगवांस्तस्मात् स एवाखिलवेदार्थः। पुरुषसूक्तार्थत्वात्तेषाम्। वेदार्थत्वात् स एव सर्वशास्त्रार्थश्च। स्मृतीनां श्रुतिमूलत्वात्॥

(श्री) (पुरुषः प्रतिपाद्यः इति? पुरुषः पशुः प्रतिपाद्य इत्यर्थः? 'अबध्नन् पुरुषं पशुम्' इत्यन्ते श्रवणादिति भावः। ननु पुरुषसूक्ते 'सहस्रशीर्षा पुरुष' इति पुरुषशब्दश्रवणेन पुंशब्दस्य अश्रवणात् पुमान्नामेति कथमुक्तम् इत्यत आह पुमान् पुरुषो नामेति। पूर्णत्वं कथं पुरुषशब्दप्रवृत्तौ निमितम् ? इत्यत आह पॄ पालनेति। तथा च पुरः पॄ धातोः कुषन् प्रत्यये ककारनकारयोर्लोपे 'उदोष्ठ्यपूर्वस्य' इति पॄ इत्यस्य ऋत उकारे तस्य उरण् रपर इति रपरत्वे पुरु + उष पुरुषेति रूपम्।

तथापि किमायातम्? भगवतः पुरुषसूक्तप्रतिपाद्यत्वेऽपि सर्ववेदप्रतिपाद्यत्वे किमायातम्? न हि पुरुष सूक्तमेव वेद इत्यर्थः॥ पुरुषसूक्तार्थत्वात् तेषामिति। वेदाः पुरुषसूक्तगाः इत्यनेन सर्ववेदानां पुरुषसूक्तार्थतायाः अवगतत्वात्। व्याख्यानव्याख्येययोश्च एकार्थत्वात् इति भावः॥)

CC0. In Public Domain. Digitized by Muthulakshmi Academy



(ज) ततश्च स एव सर्वशब्दार्थः॥

(श्री) (वेदार्थत्वादेव इत्यर्थः। उक्तसर्वशब्दानाम्। य एव लौकिकास्त एव वैदिका इति न्यायात् इति भावः। ... भगवान् सर्ववेदार्थः परंपरया सर्ववेदार्थोऽकारार्थत्वात्। यो यद्व्याख्येयार्थः स तदर्थः यथा संप्रतिपन्न इति वा। सर्वे वेदाः ईश्वरपराः उक्तरीत्या तत्परोंकारव्याख्यानत्वात् इत्यनुमानेन इत्यर्थः॥

**(आ) 'स एव सर्वशब्दार्थ' इत्याहोपनिषत्परा।**
**'ता वा एता ऋच' इति विशेषणाप्यृगर्थताम्।**
**'यो देवानां' इति श्रुत्या देवनाम्नां विशेषतः।**
**स्पष्टत्वात् तद्गतत्वेन ॥५॥**

(ज) इत्येतमुक्तमर्थं परमेश्वरस्य सर्ववेदार्थत्वं 'ता वा एताः सर्वा ऋचः सर्वे वेदाः सर्वे घोषा एकैव व्याहृतिः प्राण एवं इति परोत्कृष्टा विस्पष्टवादिनीति यावत् उपनिषदप्याह। ... नन्वेवं सर्ववेदानां भगवत्परत्वत्वात् यस्यकस्यापि वेदस्य व्याख्यानादिकं तस्य तुष्टिकरमिति, किं ऋचामेव व्याख्यानेन? इत्यत आह- विशेषेण इति॥ 'सर्वे वेदा' इत्युक्त्वा यदृच इति पुनरभिधत्ते, तेन जानीमो विशेषेणापि ऋगर्थतां ईश्वरस्याहोपनिषदिति। अन्यथा तद्वैयर्थ्यात्॥ अतः तद्व्याख्यानादिकं तस्यातितुष्टिकरमिति तदेव क्रियत इति॥

वेदान्तराद्विशेषतः कथं ऋचां परमेश्वरपरत्वमिति तं प्रकारमाह य इति। 'यो देवानां नामधा एक एव' इति श्रुत्या अग्न्यादिदेवनाम्नां तद्गतत्वेन भगवद्वाचित्वेन कारणेनर्चां तद्गतत्वेन विशेषतः स्पष्टत्वात् विशेषेणाप्यृगर्थतामाह इति॥

इदमुक्तं भवति - वेदान्तरस्य खलु आपाततः कर्मादिप्रतिपत्तिपरस्य भगवत्परताज्ञानं मन्दानां दुःशकं भवति। ऋचां तु अग्न्यादिगुणवर्णनपराणां अग्न्यादिनाममात्रस्य भगवद्वाचित्वज्ञानमात्रेण भगवत्परत्वावधारणं सुकरमिति तासां विशेषतः परमेश्वरपरत्वमुच्यत इति। तदुक्तम् (महैतरेयोपनिषद्भाष्ये)

'ऋचस्तु विशेषत इन्द्रादिनामवतो विष्णोर्गुणानल्पज्ञानामपि
प्रकाशयन्तीति प्राणे नारायण एवेति विद्यात्' इति॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

(मन्त्रब्राह्मणादिसर्ववेदानां मुख्यतो भगवत्परत्वप्रतिपादकोपनिषद्वाक्योदाहरणेन इत्यर्थः। विनियुक्तानां ब्राह्मणेनेति शेषः अविवक्षितार्थत्वेनेति। हुं फड् इत्यादि विषहरमन्त्रस्येवोच्चारणमात्रेण अदृष्टार्थत्वमेव, न दृष्टार्थत्वमित्यर्थः। अयं भावः उरुप्रथा उरु प्रथस्वेति पुरोडाशं प्रथयतीति ब्राह्मणं उरु प्रथेति मन्त्रं पुरोडाशप्रथनरूपे कर्मणि तावद्विनियुंक्ते। न हीदं मन्त्राणां विवक्षितत्वे संभवति। पुरोडाश प्रधनरूपार्थस्य उरु प्रथेत्यादि मन्त्रेणाप्रतिपादनात्॥ एवमेव ब्राह्मणवाक्यं 'अग्निमीळ' इत्यादि मन्त्रं यस्मिन् कर्मणि विनियोक्ष्यते तत्रैव तात्पर्यं न स्वार्थे इत्येवं मन्त्राणां अविवक्षितार्थत्वात् अव्याख्येयता इत्येतदपि एतेनैव निरस्तम्॥ मुख्यतः पदसमन्वयन्यायेन एतेषां भगवत्परताया उदाहृतोपनिषद्वाक्यसिद्धत्वात्। वाक्यान्वयपक्षेऽपि भगवत्प्रीत्यर्थमेवामुख्यतः कर्माद्यभिधायकत्वात्। ब्राह्मणेन यत्रार्थे यो मन्त्रो विनियुज्यते तदर्थप्रतिपादनस्य तस्मिन् मन्त्रे अभावे तदंशे अदृष्टार्थत्वमेव कल्प्यम्। तद्भावे तु दृष्टादृष्टोभयार्थत्वमेव स्विष्टकृदादिवत् इति न स्वार्थे विवक्षाया अभाव इति युक्ता व्याख्येयता इति॥)

---

(२)



(आ) एवमेवाह भगवान्निरुक्तिं बादरायणः -

'यथैवाग्न्यादयः शब्दाः प्रवर्तन्ते जनार्दने।
तथा निरुक्तिं वक्ष्यामो ज्ञानिनां ज्ञानसिद्धये॥'
इति॥

(ज) भगवान् बादरायणः सर्वशब्दानां ईश्वरपरतया निरुक्तिं निर्वचनमाह। ... चिरन्तननिरुक्त्याद्यनुसारेण प्रवृत्तेऽस्मद्व्याख्यानेऽर्वाचीननिरुक्त्यादिविसंवादोऽनादरणीय इत्येतदपि अनेन सूचितं भवति।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

ऋगर्थश्च त्रिविधो भवति। (१) एकस्तावत् प्रसिद्धग्न्यादिरूपः।, (२) अपरः तदन्तर्गतेश्वरलक्षणः। (३) अन्योऽध्यात्मरूपः। तत् त्रितयपरं चेदं भाष्यम्॥ अयमादितः प्रयुक्तोऽग्निशब्दोऽग्नेस्तदन्तर्गतहरेश्च बाह्ययज्ञे अध्यात्मं च हरेर्ज्ञानयज्ञे मुख्यामुख्यत्वाभ्यामग्र एवाशेष पूज्येभ्यः पूर्वमेवाभिपूज्यतामभिपूज्यत्वमाहेति संबन्धः॥

(श्री) (बादरायणप्रणीतनिरुक्तिरूपविशेषशास्त्रबलेन। चिरन्तनेति । बादरायणीय निरुक्तादीत्यर्थः। आदिपदेन महाव्याकरणसंग्रहः। अर्वाचीननिरुक्तादीति। यास्कपाणिन्यादि प्रणीतनिरुक्तव्याकरणादीत्यर्थः। क्वचित्तद् यास्कादिनिरुक्ताद्यनुसरणं तु संवादायेति भावः। अत एवोक्तं विसंवादोऽनादरणीय इति॥

सङ्कीर्णस्य भाष्यस्य सुबोधाय अर्थत्रयं विभज्य दर्शयति त्रिविध इति। अध्यात्मरूपः शरीरान्तर्गतेश्वरादिरूपः। एवं स्थिते अग्निं विष्णुं इत्यादि भाष्य एव स्पष्टमेतदिति भावः।.

मुख्यामुख्यत्वाभ्यामिति। बाह्ययज्ञे अमुख्यत्वेन अग्नेर्बाह्ययज्ञे तदन्तर्गतस्य हरेरध्यात्मं च ज्ञानयज्ञे हरेर्मुख्यत्वेननि विवेकः॥)

---

## (३)



(आ) मुनिस्तु सर्वविद्यानां भगवान् पुरुषोत्तमः।
विशेषतश्च वेदानां यो ब्रह्माणमिति श्रुतिः ॥२॥
ऋग्वेदादिकमस्यैव श्वसितं प्राह चापरा।
'वाचो बभूवुरुशतीर्हयग्रीवादिति स्फुटम्।
वचो भागवतेऽप्यस्ति ब्रह्माण्डेऽपि तथा परम्॥५॥
हयग्रीवादिमा विद्याः श्वसितत्वेन निःसृताः।
ब्रह्मणा स्वीकृतास्ताश्च रुद्रशेषविपा अपि ॥९॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

दक्षाद्याः सनकाद्याश्च शक्राद्या मनवस्तथा।
जगृहुस्ते च विश्वस्मिंश्चक्रुर्व्याप्तस्ततोऽखिलाः' ॥१०॥
उक्तं पद्मपुराणे च-
'कपिलो भगवानजः प्रोवाच ब्रह्मणे विद्या।'
हृदिस्थो बादरायणः। ओंकारपूर्विका विद्याः प्रेरयत्यखिलेष्वपि।
सदैव ब्रह्मणे पूर्वम्॥' इति सात्वतसंहिता॥
सकृन्निगदमात्रेण गृहीतं ब्रह्मणाऽखिलम्।
अन्तर्गतस्य व्यासस्य प्रसादान्नित्यशक्तितः ॥११॥
तेन चानन्तशाक्तित्वाद्युगपत्समुदीरितम्।
प्रथमप्रतिपत्तृत्वान्मुनिर्ब्रह्माऽखिलस्य च ॥१२॥
सुपर्णोऽखिलवेदानां पञ्चरात्रस्य नागराट्।
द्वितीयप्रतिपत्तृत्वान्मुनित्वे संप्रकीर्तितौ ॥१३॥
यः पश्यति स्वयं वाक्यं स ऋषिस्तस्य कीर्तितः।
अर्वाक् तु द्वादशावृत्तेरधीत्याऽप्यृषिरेव सः॥१४॥
यत् स्वयंप्रतिभातस्य संशयार्थं गुरोर्वचः।
सुपर्णादेर्विरिञ्चस्य केवलं धर्मकारणम्॥१५॥
ऋचामृषिस्ततः शक्रो यजुषां सूर्य एव च।
सोमः साम्नां तृतीयास्ते प्रतिपत्तार ईरिताः।
अथर्वाङ्गिरसामग्निरेकर्षिश्चाप्यथर्वणाम् ॥१६॥
इत्युक्ताः समुदायस्य (v.l. विभक्तविद्या समुदायानां) सन्त्यन्ये न पृथक्पृथक्।
एतज्ज्ञानाददृष्टस्य फलस्याप्तिः स्फुटं भवेत् ॥१७॥
द्रष्टॄणां तु चतुर्थानां ज्ञानादप्यैहिकं भवेत्।
ते चैकस्यापि बहवः स्युः सूक्तर्स्यच एव वा ॥१८॥
तस्यां तस्यामवस्थायां तत्तत्प्राप्तिविशेषतः।
तेषां वाक्यस्वरूपेण प्रार्थनादिषु पश्यति॥१९॥

(ज) ... ज्ञानादिकं ऋष्यादिज्ञाने सत्येव सफलं नान्यथा।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

'यो ह वाऽविदितार्षच्छन्दोदैवतब्राह्मणेन मन्त्रेण यजति वाध्यापयति स्थाणुं वर्च्छति गर्ते वा पद्यते प्रवामीयते॥' इति श्रुतेः। तस्मादृषिच्छन्दोदैवतादिकं ज्ञापयन् ऋषिं तावदाह॥ ... विशेषतश्च वेदानां भगवान् ऋषिः। पौरुषेयवाक्यानां उत्पत्त्यनन्तरमेव दर्शनं वेदानां तु सर्वदा इति विशेषः। कुत एतदित्यत आह-

'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै॥'

(श्वेताश्वतरोपनिषत्) इति श्रुतिस्तावद् ब्रह्मणोऽपि भगवान्वेदादिकमुपदिदेशेति प्राह । तेन ज्ञायते स एव सर्वविद्यानां ऋषिः इति। न ह्येवंभूतस्याऽन्योऽध्यापकः संभवति॥ श्रुतिः प्राहेति वक्ष्यमाणेनान्वयः-

'अस्य महतो भूतस्य विश्वसितमेतद्
यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वांगिरस
इतिहासः पुराणं विद्या उपनिषदः
श्लोकाः सूत्राण्यनुव्याख्यानानि
व्याख्यानान्यस्यैवैतानि निश्वसितानि ॥

(बृहदारण्यके)

इत्यपरा च श्रुतिः ऋग्वेदादिकमस्य विष्णोरेव निश्वसितं प्राह। तेनापि तस्यर्षित्वं ज्ञायते। निश्वसितमिति हि निश्वसितमिव अनायासेन आदिकाले तेनोच्चारितं इत्यर्थः॥

(ननु यो यस्य दृष्टा स तस्य ऋषिरुच्यते? एवं भगवद् दृष्टत्वस्य सर्वसाधारण्याद् विशेषत इत्युक्तो विशेषः क? इत्यत आह। पौरुषेयेति। यथा चात्र सर्वविद्याशब्दः पौरुषेयग्रन्थपर इत्युक्तं भवतीति द्रष्टव्यम्। एतद् भगवतोऽत्र ऋषित्वम्। ननु ब्रह्मण इव भगवतोऽप्यध्यापकश्चेदन्यः स्यात्तर्हि तस्यैव ऋषित्वं स्यान्न भगवत इत्यत आह - न हीति। एवंभूतस्येति। आदिकविभूतस्य ब्रह्मणः द्रष्टुः तदुपदेष्टुश्च भगवत इत्यर्थः॥

निःश्वसितत्वोक्त्या कथं ऋषित्वं ज्ञायते? इत्यत आह - निःश्वसितमिति हीति। इवशब्दोक्तश्वाससाम्यमाह - अनायासेन इति। यथा प्रतिक्षणं श्वासा अनायासेन भवन्ति तथा इत्यर्थः। वाचो बभूवुरिति।

भागवते द्वितीयस्कन्धे - 'वाचो बभूवुरुशतीः श्वसतोऽस्य नस्त' इति।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

'सत्रे ममास भगवान् हयशीर्ष एकः
साक्षात्स भगवांस्तपनीयवर्णः।
छन्दोमयोऽमृतमयोऽखिलदेवतात्मा
वाचो बभूवुरिति॥

पद्मपुराणे 'कपिलः प्रोवाच' इति निरूपणात्। सात्वतसंहितायामपि 'हृदिस्थो बादरायणो विद्याः प्रेरयति', ब्रह्मणे ददौ इति स्पष्टं प्रतिपादनात् इत्यर्थः॥



(ज) एवं परमेश्वरः सर्वविद्यानां ऋषिरित्युपपाद्य ब्रह्मापि तथा इत्याह। सकृदिति। यस्मात्तेन परमेश्वरेणानन्त शाक्तत्वाद् युगपत्यमुदीरितमखिलं विद्याजातमादिकाले सकृन्निगदमात्रेण ब्रह्मणान्तर्गतस्य व्यासस्य प्रसादान्नित्य शक्तितः॥ इति तत्प्रसादायत्तनित्यशक्त्या गृहीतं तस्मादेवं सर्वविद्यानां प्रथमप्रतिपत्तृत्वाद् ब्रह्मापि अखिलस्य विद्याजातस्य मुनिर्भवति॥

एवं सर्वविद्यानां ऋषिमुक्त्वा तत्प्रभेदानां ऋष्यन्तरं चाह - सुपर्ण इति।
एतौ च द्वितीयप्रतिपत्रृत्वात् ब्रह्मणोऽनन्तर प्रतिपत्तृत्वात् मुनित्वे विषये
द्वितीयौ संप्रकीर्तितौ॥ ... यथा यः स्वयं अध्ययनेन विनैव यद्वाक्यं पश्यति स
तस्य वाक्यःसर्षिः प्रकीर्तितः। एवं यो द्वादशावृत्तेरर्वागधीत्यापि प्रतिपद्यते सोऽप्यृषिरेव।
तथाभूतो हि स्वयंप्रतिभातविद्याकल्प एव भवेत्। न ह्यन्यः एतावन्मात्रेण अध्ययनेन
सर्वविद्याः प्रतिपत्तुं शक्नोति। ब्रह्माद्यास्तु भगवत्प्रसादात् स्वयं प्रतिभाताखिलविद्याः
सकृदधीतवन्त इत्यृषित्वं तेषां उपपन्नमिति भावः॥

यद्येवं ब्रह्मादीनां स्वयंप्रतिभातविद्यत्वादृषित्वं तर्हि तेषामध्ययनं किमर्थमित्यत आह - यत्स्वयं इति। सुपर्णादेः यत् स्वयंप्रतिभातस्य वेदादेः गुरोर्वचो निगदरूपं तदस्माभिः दृष्टोऽयं वेदो वा यत्किञ्चिद्वेति संशयनिरासेन वृत्त्यर्थं वेद एवायं इति निश्चयार्थं भवति॥ विरिञ्चस्य तु संशयाभावात् केवलं धर्मकारणं भवति। महतो हि धर्मस्य कारणं परमेश्वराद् अध्ययनम्। एवं पौरुषेयापौरुषेयभेदेन सर्वविद्यानां

CC0. In Public Domain. Digitized by Muthulakshmi Academy



ऋषिभेदमुक्त्वा वेदेष्वेव अवान्तरभेदेन तमाह - ऋचां इति। ततः सुपर्णाद्यनन्तरं ऋगादीनां अथर्वाद्यन्तानां शक्राद्या एकर्षिपर्यन्ता ऋषयः। ते तृतीयाः प्रतिपत्तार ईरिताः ।

इत्येते प्रायेणाविभक्तविद्यासमुदायानां ऋषयः त्रिविधा उक्ताः। एतेभ्योऽन्ये चतुर्थाश्च। पृथक्पृथक् ऐकैकस्मिन् अपि ऋगादिसमुदायेऽवान्तरभेदानां शाखादीनां ऋषयः सन्ति। ते च शास्त्रान्तराज्ज्ञातव्या इत्यर्थः। ऋगाद्यवान्तरभेदानां सूक्तादीनां चतुर्था ऋषयः सन्तीत्युक्तम्। तत्र च एकैकस्यापि सूक्तादेरेकैक एवेति नियमो नास्तीत्याह - ते चेति।

(श्री) (सकृन्निगदमिति। निगदो निगदनं उच्चारणं इत्यर्थः। नित्यशक्त्या अखिलविद्याग्रहणयोग्यतारूपया। तद्भेदानां अपौरुषेयपौरुषेयाणाम्। कथं ऋषय ? इति। तथासति अधीतविद्यात्वादिविशेषात् सर्वेषामपि ऋषित्वं स्यादिति भावः। ऋषित्वं तावदाहेति। आदौ तावद् ऋषित्वं निर्वक्ति। द्वादशावृत्तेरर्वाक् इति। समग्रद्वादशावृत्तिव्यतिरेकेण इत्यर्थः। तथाभूतो द्वादशावृत्तेरर्वागध्येता। ... अध्ययनशब्दो भावे ल्युडन्तो न करणाधिकरणयोः इत्यभिप्रेत्य उक्तं गुरोः सकाशादध्ययनं निगदरूपमिति। गुरोरुच्चारणश्रवणमिति यावत्॥

विभक्तविद्यासमुदायानामिति पाठस्यार्थः। ..., अपौरुषेयपौरुषेयभेदेन विभक्तविद्यानां तत्समुदायानां च मिलित्वा विविधा ऋषय उक्ताः। सर्वविद्यासमुदायानां परमेश्वरचतुर्मुखयो ऋषित्वमेकः प्रकारः। विभक्तविद्यानां मध्ये सुपर्णस्य अखिलवेदऋषित्वं, नागराजस्य पञ्चरात्रऋषित्वं इत्यन्यः प्रकारः। अपौरुषाणामेव ऋगादीनां पुनः प्रत्येकं शक्राद्या ऋषयः इत्यपरः प्रकारः। इति त्रैविध्यं द्रष्टव्यम्।

ऋगादिरूपेण चतुर्धा वेदविभागापेक्षया अवान्तरशाखाभेदेन बहुधा ऋगादिविभागापेक्षया च अपौरुषेयपौरुषेयभेदेन द्वैविध्येन सर्वविद्यासमुदायविभागस्य अल्पत्वात् पौरुषेयापौरुषेयभेदेन द्वैविध्यविभागाभिप्रायेण विभक्तेत्युक्तमिति भावः॥

प्रायेणाविभक्तविद्येत्येव पाठः साधीयान्। तत्र च पौरुषेयापौरुषेयभेदेन विभागमकृत्वा सर्वविद्यासमुदायस्य परमेश्वरचतुर्मुखौ ऋषी, ऋगादिरूपेण विभागमकृत्वाऽखिलवेदसमुदायस्य सुपर्णो ऋषिः। ऋचामपि पुनः चत्वारिंश इत्यादिशाखाभेदेन विभागमकृत्वा ऋग्वेदस्य शक्रो ऋषिः। एवं यजुरादीनां सूर्यादयो ऋषयः। इत्येवं अविभक्तसमुदायानां उक्तरीत्या त्रिविधा ऋषय इत्यर्थो द्रष्टव्यः॥ अस्मिन् पाठे समुदयानां इति बहुवचनं स्वरसम्। अत्रापि प्रायेणेत्यस्योक्ता इत्यनेन अन्वयः॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

ऋगादिसर्वविद्यासमुदये विद्यमाना ये ऋगादिचतुर्वेदान्तरप्रभेदाः तेषामपि अवान्तरभेदरूपाः ये शाखोपशाखाः सूक्ताद्याः तेषां इति योज्यम्। एवं चतुर्विधानिति। (१) सर्वविद्याऋषयः। (२) अखिलवेदऋषयः। (३) ऋगाद्यवान्तर्भेदऋषयः। (४) तदवान्तरशाखोपशाखा ऋषयश्चेति चतुर्विधानित्यर्थः॥



(आ) देवता सर्वविद्यानां स्वयं नारायणः प्रभुः।
ऋते तत्र प्रसिद्धाश्च देवता श्रीस्तथाऽत्र च ॥२०॥
ऋते प्रसिद्धा ब्रह्मैव ततस्तेन क्रमेण च।
पूर्वप्रसिद्धवर्जं तु शक्रान्ता देवता मताः ॥२१॥

(ज) स्वयं साक्षात्। प्रभुरिति देवतात्वोपपादनार्थम्। तत्र भगवति। प्रसिद्धाः पुरुषसूक्तादिविद्याः। ऋते वर्जयित्वाऽन्यासां विद्यानां श्रीश्च देवता। तथाऽत्र च श्रीदेव्यां प्रसिद्धा विद्याः अंभ्रणीसूक्ताद्याः। ऋते अन्यासां ब्रह्मैव देवता। ततः परं च तेन वक्ष्यमाणेन तारतम्यक्रमेणैव। पूर्वप्रसिद्धवर्जं पूर्वस्यां प्रसिद्धा विद्या वर्जयित्वा अन्यासां विद्यानां तु शक्रान्ता देवता मताः॥

(आ) ब्रह्मवायू गिरौ वीन्द्रशेषरुद्राश्च तत्स्त्रियः।
शक्रकामौ कामपुत्रमनुदक्षाङ्गिरः सुताः ॥२२॥
तद्वच्छची रतिः सूर्यसोमधर्मादि तत्स्त्रियः।
प्रधानमरुतो वारिपतिरग्निश्च मारुताः ॥२३॥
निऋतिः स्त्रियश्च सूर्यादेराश्विनावितरे तथा।
अनन्तकोटिशतकदशार्धाद्यंशतः क्रमात्॥२४॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy



(ज) कोऽसौ देवतानां क्रमः? इत्यत आह - ब्रह्मेति। गिरौ सरस्वतीभारत्यौ। अङ्गिरसः सुतः बृहस्पतिः। ... ॥

(आ) इन्द्रावरा विशेषेण लिङ्गेनैव पृथक्पृथक्।
देवतास्तत्र स्युरेष एव परो विधिः ॥२५॥

यद्येता सर्वा आपि विद्यादेवता कथं तर्हि शक्रान्ता देवता इत्युक्तम्? तत्राह - यद्यप्येताः सर्वा अपि विद्यादेवता भवन्त्येव, तथापि पृथक्पृथक् विशेषेण व्यावर्तकेन। लिंगेन श्रुतिलिङ्गादिनां ज्ञापकेनैव इन्द्रावरास्तत्र तत्र विद्यासु देवताः स्युः, न तु श्रुतिलिङ्गाद्यभावे। इन्द्रपर्यन्तास्तु श्रुत्याद्यभावेऽपि पूर्वप्रसिद्धवर्जं देवताः स्युरिति शक्रान्ता देवता इत्युक्तम्॥ अन्ये तु ब्रुवते - तत्तत् श्रुत्यादिनैव विष्ण्वाद्या देवताः स्युः इति। तदसत् इति भावेनाह - एष एवेति। विधिः प्रकारः। देवतास्थितिः। प्रामाणिकत्वात् इति शेषः॥

(श्री) (श्रुतिलिङ्गादिना इत्यत्र रूढः शब्दः श्रुतिः। 'लिङ्गं स्वरूपमुद्दिष्टं लिङ्गं ज्ञापकमेव च' इति वचनानुसारेण ज्ञापकेन इत्युक्तम्। यत्र च स्ववाचकश्रुतिलिङ्गं च अस्ति तत्र एव एते प्रतिपाद्या, न तु सर्वत्र इति भावः। पूर्वप्रसिद्धवर्जं, स्वोत्तमेषु प्रसिद्धसूक्तभागं वर्जयित्वा इत्यर्थः। इन्द्रादवरदेव विष्ण्वाद्याः शक्रान्ता अपि श्रुतिविशेषलिङ्गादिना एव देवताः। अतो न उक्तविभागः अयुक्त इति भावः। देवतास्थितिः वेदप्रतिपाद्यदेवतास्वरूपस्थितिः।)

(आ) वेदादिवर्णपर्यन्तैर्मूर्तयः केशवस्य तु।
समासव्यासयोगेन वाच्यास्तात्पर्यतः पृथक् ।
यथायोगं यथान्यायमन्यासामपि मूर्तयः ॥२६॥
ऋक्संहितायां स्वाध्याये निरुक्ते व्यासनिर्मिते।
प्रवृत्ते चैतदखिलमुक्तं हि प्रभुणा स्वयम् ॥२७॥
सर्वे वेदाश्च नामानि ता वा एता ऋचस्तथा।
इन्द्रं मित्रं वरुणमित्याद्यत्र च प्रमा परा ॥२८॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

'देवतातारतम्यं च सर्वोत्कृष्टं च केशवम्।
ज्ञात्वैव मुच्यते ह्यस्मान्नान्यथा तु कथञ्चन'॥२९॥
इति पैङ्गिश्रुतिश्चाह दृश्यन्तेऽत्र च सर्वशः।
न ते महित्वमित्यादिनैश्वरानेव केवलान् ॥३०॥
गुणान् विष्णोः श्रुतिर्ह्याह नैव दोषान् कथंचन।
जाता परिबभुवेति मर्यादां ब्रह्मणोऽपि हि ॥३१॥

(ज) वेदादि वर्णपर्यन्तशब्दैः समासव्यासयोगेन पृथक्वाच्या इति समस्तवेदेन एका तत्प्रभेदैस्तावत्यः तदवान्तरभेदैरपि तावत्य इत्येवंप्रकारेण वाच्या इत्यर्थः। तदपि यथायोगं योगवृत्तिमनतिक्रम्य। यथान्यायम् तत्तन्मूर्तीनां ज्ञापकं न्यायं च अनतिक्रम्य ज्ञातव्यं अन्यासामपि लक्ष्म्यादिदेवतानां मूर्तयो विद्यासु वाच्या ज्ञातव्याः॥

(श्री) (समस्तवेदमारभ्य ऋगादिशाखाष्टकाध्यायसूक्तवर्गऋगर्धर्चपादद्वारा वर्णपर्यन्तं इत्यर्थः। यथान्यायम् यथोक्तस्तैस्तैर्युक्तिश्रुतिन्यायविशेषयोग्यता यथा इति॥)

(ज) यास्कनिर्मितप्रसिद्धनिरुक्तव्यावृत्तये व्यासनिर्मित इति। विष्णोः सर्वविद्याप्रतिपाद्यत्वे श्रुतिरपि पठति - सर्व इति। 'सर्वे वेदा यत्पदमामनन्ति', 'नामानि सर्वाणि यमाविशन्ति', 'ता वा एताः सर्वा ऋचः', 'इन्द्रं वरुणमग्निमाहुः' इत्यादीति अविभक्तको निर्देशः। ... विष्णोः सर्वोत्तमत्वान्मुख्यतः सर्वविद्यावेद्यत्वं लक्ष्म्यादीनामपि आधिक्यतारतम्यानुसारेण विद्यावेद्यत्वमुक्तम्। तदाधिक्यतारतम्यं प्रमाणैः साधयन् विष्णोः सर्वोत्तमत्वं तावदादौ साधयति - देवतेति। अस्मात् संसारात्। अत्र च अस्यामपि शाखायाम्। सर्वशो विष्णोः सर्वोत्तमत्वादिकं दृश्यते।

(श्री) (अस्यां शाखायां ऋक्शाखायाम्।)



CC0. In Public Domain. Digitized by Muthulakshmi Academy

(आ) अतः सर्वाधिको विष्णुर्निर्णीतः श्रुतिसश्चयात्।
अतोदोषवतो यत्र तद्वाक्यमवरं वदेत्
निर्दोषतैव विष्णोस्तु क्रमान्मध्यगतेष्वपि ॥१॥
'त्रयोर्थाः सर्ववेदेषु दशार्थाः सर्वभारते।
विष्णोः सहस्रनामापि निरन्तरशतार्थकम्॥' २॥
इति स्कान्दवचो यस्मादर्थभेदव्यपेक्षया।
निर्दोषत्वं हरेर्वक्ति दोषमन्येष्वपि क्रमात्॥३॥
तारतम्यस्य विज्ञप्त्यै वचो दोषस्य चार्थवत्।
गुणाः श्रुता इति ह्याह गुणैकनियतिं हरौ ॥४॥
'निर्दोषगुणपूर्णश्च विष्णुरेको न चापरः।
अपूर्णा दोषरहिता मायैका तद्वशैव च।
अदोषः प्रायशो ब्रह्मा दोषवन्ताः क्रमात्परे'' ॥५॥
इति मान्यश्रुतिश्चाह भेदोऽर्थानां ततो मतः।
रूढिमेव समाश्रित्य विभज्यार्थान्यथाक्रमम् ॥६॥
विदोषगुणपूर्त्यर्थं विष्णौ योगार्थमानयेत्।
पश्चादेव यथायोगमितरेष्वपि संनयेत् ॥७॥

(ज) यत्र वाक्ये विष्णोर्दोषवचो दोषाभिधानं प्रतीयते तद्वाक्यमवरं संभावितदोषं वस्त्वन्तरं वदेदिति योज्यम्। ... दोषवचोऽधिकदोषाभिधानम्। अत्र उभयत्रापि दोषग्रहणं गुणाल्पताया अपि उपलक्षणम्। ... यतो विष्णोः सर्वथा निर्दोषता प्रमाणैर्निर्णीता यतश्च मध्यगतेष्वपि लक्ष्म्यादिषु क्रमान्निर्दोषता निर्णीता अतः इत्यर्थः। निर्दोषता इत्युपलक्षणम्। गुणपूर्तिरपीति द्रष्टव्यम्। यदि दोषाभिधायिवाक्यमन्यपरं तर्हि विष्ण्वादीनां सर्ववेदादिवेद्यता न स्यात्? इत्यत आह - त्रय इति। निरन्तरशतार्थकं इत्यनेन सर्वाण्यपि पदानि शतार्थानि इत्युच्यते। इति स्कान्दवचो यस्माद्वेदस्य अनेकार्थतां वक्ति, तस्मादर्थभेदव्यपेक्षया योजनाविशेषविवक्षया एकमेव वाक्यं हरेः निर्दोषं अन्येषु क्रमात् दोषमपि वक्ति इति अङ्गीकारात् अदोषः इत्यर्थः ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

ननु दोषाभिधायि वाक्यं देवतान्तरेऽपि कस्मात् अन्यथा न योज्यते? दोषाभिधाने प्रयोजनाभावात्? इत्यत आह - तारतम्यस्य इति। यदि तत्तद्देवतासु विद्यमाना दोषा नैवोच्येरन् न तर्हि तासां तारतम्यं विज्ञायेत। तज्ज्ञानं च अवश्यमपेक्षितं मुमुक्षोः। ... अतः तज्ज्ञापनाय दोषवचनमपि सार्थकं इत्यर्थः॥

आह श्रुतिः माया श्रीः। निर्दोषः इत्यादिका मान्यश्रुतिश्चाह गुणैकनियतिं हरौ। अन्येषु च यथास्वरूपमिति शेषः। ततः परमेश्वरस्य निर्दोषगुणपूर्णत्वात् अन्येषां च उक्तस्वरूपत्वात् योजनाभेदेन अर्थानां भेदो वैलक्षण्यमेव मतं इत्यर्थः॥

यथायोगमिति योगवृत्त्या विष्णोर्वेदवेद्यत्वमुक्तम्। तन्नोपपद्यते। सर्वज्ञ इत्यादौ सर्वादिशब्दानां अन्यपरत्वे हरेः सर्वशब्दाभिधेयत्वस्य व्याघातात्। भगवत्परत्वे योगायोगादित्याशङ्क्य स्मृत्यैव परिहरति - रूढमिति। सर्वादि शब्दानां रूढिमेव वृत्तिं तावत् समाश्रित्य निखिलादीन् अर्थान् विभज्य विस्पष्टं ज्ञात्वा अनन्तरं यथाक्रमं शब्दानुशासनादिक्रमानतिक्रमेण विष्णौ सर्वज्ञादि शब्दानां योगार्थमानयेत्। पश्चात् सर्वादिशब्दानां अपि सरवादिशब्दानां रूढार्थानुपादाय एव सरवः सर्व इत्यादि योगवृत्तिमानयेत् इत्यर्थः॥

किमनेन, रूढ्या एव परमेश्वरस्य वेदवेद्यता अस्तु इत्यत उक्तम्-विदोष इति । भगवतो दोषाभावगुणपूर्तिज्ञापनार्थं हि वेदानां प्रवृत्तिः। न च रूढिमात्रेण सम्यक् तद्भवति। अतो योग एवाश्रयणीयः। यथा योगं तत्तद्देवतायोग्यतानतिक्रमेण॥

(श्री) (भाष्ये अदोषः प्रायशो ब्रह्म इत्युक्तः प्रायः शब्दार्थो-

ऋजूनामेक एवास्ति परमोत्साहवर्जनम्।
स गुणाल्पत्वमात्रत्वान्न जीवेन विरुध्यते॥

इत्युक्तरीत्या द्रष्टव्यः। वेदादिवर्णपर्यन्तं इत्यारभ्य यथायोगं इत्यन्तेनार्थः। योगायोगात् इति। भगवन्नामावर्तमात्रत्वं प्रसङ्गेन योगस्य कर्तुमशक्यत्वात् इत्यर्थः। निखिलादीन् सर्वशब्दार्थभूतान् विस्पष्टं रूढ्या ज्ञात्वा, योगार्थं निखिलार्थविषयकज्ञानवान् इत्यादि यौगिकार्थं आनयेत् जानीयात्॥ सरवः रवेण वेदेन सहितः तत्प्रतिपाद्य इत्यर्थः। नन्वेवं रवादिशब्दानां अपि पुनर्यौगिकत्वेन, तेषामपि भगवद्वाचकत्वप्रसिद्ध्यर्थं? तत्रापि पुनर्योगाङ्गीकारे तत्रापि एवं इत्यनवस्था स्यात्? तत्परिहाराय अन्ततः क्वचित् प्रकृतिप्रत्यययोर्वा, केवलं रूढ्या अन्यपरत्वं अङ्गीकार्यम्। यथोक्तं कर्मनिर्णये 'अनवस्थानिवृत्त्यर्थं यौगिके रूढिकल्पना' इति। तथा च अन्यत्र रूढिं प्रकृत्यादिवाच्यत्वाप्राप्त्या भगवतः सर्वशब्दवाच्यताभङ्ग

CC0. In Public Domain. Digitized by Muthulakshmi Academy

इति चेत्, सत्यम्। सिद्धान्तरहस्यानभिज्ञोऽसि। न हि प्रकृतिप्रत्ययाद्यसंस्कृतशब्दवाच्यत्वं अस्मभिरुच्यते। येन प्रकृत्यादौ योगासंभवेन केवल रूढ प्रकृत्यादिवाच्यत्वाभावेन उक्तपरिचोदनानवकाशः। किं नाम? प्रकृत्यादिसंस्कारैः युक्त सर्वशब्दवाच्यत्वमेव। तथा च प्रकृत्यादेः अन्यपरत्वेऽपि न अस्माकं दोष इत्यादिकं सिद्धान्तरहस्याभिज्ञचूडामणिभिः अस्मदाचार्यैः कृतायां प्रथमाध्यायचतुर्थपादीय सुधा टिप्पण्यां सविस्तरं प्रतिपादितं तत्रैव अनुसन्धेयम्॥)

(आ) ऋग्वेदसंहितायां च प्रभुणैवं समीरितम्।
पृथग्रूपाणि विष्णोस्तु देवतान्तरणाणि च ॥८॥
अग्न्यादिसूक्तवाच्यानि नाम्ना सूक्तभिदा भवेत्।
नकिर्माकिः स्मसीत्यादिप्रोक्ताऽधिक्यविवक्षया ॥९॥
आधिक्येधिकमित्येव हरिणा सूत्रमीरितम्
कृत्वीहत्वीति पूर्वाश्च तृतीयोऽतिशये यतः ॥१०॥
विश्लिष्टार्थे च विश्लिष्टमूनार्थे चोनमिष्यते
व्यत्ययोऽभेदकरणस्वातन्त्र्येषु समीरितः ॥११॥

(ज) ननु यदि सर्वोऽपि वेदो भगवत्परः कथं तर्हि इदं अग्निसूक्तं इदं वायुसूक्तं इति सूक्तभेदः? इत्यत आह- पृथक् इति॥ द्विविधानि भगवद्रूपाणि अग्न्यादिसूक्तवाच्यानि - (१) अग्न्यादिदेवतान्तरगाणि, (२) पृथक् तदनन्तर्गतानि च। तत्र आद्यानां स्वनाम्ना अधिष्ठाननाम्ना च अग्न्यादिसूक्तभेदो भवेत्। इतरेषां तु स्वनाम्नैव॥

(श्री) (किमनेन? योगवृत्त्या श्रवणेन इत्यर्थः। तत् दोषाभावादिज्ञापनम्॥ आद्यानां इति। अग्न्यादिदेवतान्तर्गतभगवद्रूपप्रतिपादकविद्यानां स्वनाम्नान्तर्गतभगवन्नाम्ना मुख्यतो अग्न्याद्यन्तर्गत

CC0. In Public Domain. Digitized by Muthulakshmi Academy

तत्तन्नामकभगवत्प्रतिपादकत्वात् अग्न्यादिसूक्तत्वं अमुख्यया वृत्त्या, तदधिष्ठानभूताग्न्यादिप्रतिपादकत्वाच्च अग्न्यादिसूक्तत्वं उच्यते। इतरेषां इति। अग्न्याद्यनन्तर्गत-अग्न्यादिनामक-भगवत्प्रतिपादकानां सूक्तानां स्वनाम्ना अग्न्यादिनामक भगवन्नाम्ना एव अग्न्यादिसूक्तभेदो भवेद् इत्यर्थः॥)

(ज) 'न किरिन्द्र त्वदुत्तरः', 'माकिर्नेशत्', 'स्मसिस्था तर्हरीणामि' इत्यादौ यल्लक्षणप्राप्ताधिकं शब्दरूपं तत्तत्र प्रोक्तस्यार्थस्य आधिक्यविवक्षया प्रयुक्तं ज्ञातव्यम्। 'अधिक्येऽधिकं' इति सूत्रात् अर्थाधिक्ये विवक्षिते अधिकं शब्दरूपं भवतीति 'कृत्वी देवैर्निकिल्बिषं', 'हत्वी दस्यून्' इति पूर्वा वर्णविकाराश्च प्रोक्ताधिक्यविवक्षया प्रयुक्ता ज्ञातव्याः। यतः 'तृतीयेऽतिशय' इति सूत्रम्। अर्थातिशये विवक्षिते लक्षणप्राप्तस्य स्थाने तत् तृतीयो वर्णो भवति। अः इति ब्रह्म इत्यादि विश्लिष्टं असंहिततया निर्दिष्टं शब्दस्वरूपं विश्लिष्टार्थे तस्यार्थस्य विश्लिष्टत्वे व्यावृत्तत्वे व्याख्यातव्यम्॥

(श्री) यथोक्तं कर्मनिर्णये -

अल्पाक्षरेण शक्योऽपि वक्तुं बह्वक्षरं यदि।
उक्तस्याधिक्यमेवात्र निषेधोऽशेषतो भवेत्॥

इति। वर्णविकार इति। कृत्वा हत्वा इत्याकारस्य विपरिणामः इत्यर्थः। लक्षणप्राप्तवर्णस्य इति। 'समानकर्तृकयोः पूर्वकाले' इति सूत्रेणास्याः क्त्वा प्रत्ययान्तत्वेन लक्षणप्राप्तो वर्ण अकारः। तस्य स्थाने तदपेक्षया तृतीय इकाररूपो वर्णो भवति। अतिशये विवक्षिते सति इत्यर्थः॥ असंहिततया इति। 'परः संनिकर्षः संहिता' इति सूत्रेण वर्णानामतिशयितः सन्निकर्षः संहितासंज्ञतया उक्तत्वात्। एति वक्तव्ये अ इति असंहिततया निर्दिष्टं इत्यर्थः। व्यावृत्तत्वे इति। जगद्विलक्षण इत्यर्थः।)

(आ) अभेदो हरिरूपाणां गुणानां च क्रियासु च।
तस्यैवावयवानां च भेदः श्रीब्रह्मपूर्वकैः ॥१॥
मुक्तैरपि जडैर्भेदः कैमुत्यादेव दृश्यते।
ऋग्वेदसंहितायां च प्रोक्तमेतत्समस्तशः॥२॥
अभेदः स्वगुणाद्यैश्च मुक्तानामपि सर्वशः।
भेदाभेदस्त्वभेदश्च गुणैः संसारिणामपि ॥३॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

जडानामंशतो भेदः समुदायेन चोभयम्।
'मनुष्यगन्धर्वपितृगणकार्मिकतात्त्विकाः ॥४॥
देवाः शक्रः शिवो ब्रह्मा मुक्तौ सौख्यादिभिर्गुणैः।
शतायुतोत्तरा नित्यमन्योन्यप्रीतिसंयुताः' ॥५॥
इति सिद्धान्तगं वाक्यं स्वयं भगवतेरितम् ॥६॥

(ज) अभेदः। हरिणा परस्परं च। परिगणनस्य निमित्तमाह - भेद इति। एतत् 'पृथग्रूपाणि' इत्यारभ्योक्तम्॥

(श्री) (हरिरूपाणां गुणानां इत्यादि परिगणनस्य। भेदः। पत्यादिभिः अत्यन्तभेदस्यैव सत्त्वेन निमित्तेन रूपादीनामेव अभेदो व्याख्येयः इत्यर्थः॥)

(ज) अभेद इति। चिन्तादिभिर्गुणैः भेदसहितो अभेदः, ज्ञानादिभिरभेदः नैवं मुक्तानाम्॥

(श्री) (चिन्तादिभिः। किं मया कार्यं? इत्येवंरूपा चिन्ता। तदादिभिः। मनः कारणकैः आत्मधर्मभूतैः इत्यर्थः। आदिपदेन ध्यानादि ग्रहणम्॥ ननु भेदभेदौ इति स्यात् भेदाभेद इत्येकवचनं, कथं इत्यतो मध्यमपदलोपी समासः इत्याह - भेदेन सहितो भेदः इति। ज्ञानादिभिः इति। स्वरूपभूतज्ञानादिभिः इत्यर्थः॥

मनोवृत्तयो हि द्विविधाः। चिन्तासन्तापादयो ज्ञानेच्छादयश्च। तत्र मनसि ज्ञानादिरूपेण विकृते सति जीवे ज्ञानादयोऽभिव्यज्यन्ते। न तु जायन्ते। स्वतः सिद्धत्वात्। चिन्तादि रूपेण मनसि विकृते सति जीवे चिन्तादयो जायन्ते। तेषां अस्वाभाविकत्वात्। तथा च ज्ञानादिभिः स्वरूपभूतैः अत्यन्ताभेदः। चिन्तादिभिः भेदाभेदौ इत्यर्थः॥

तथा च संसारिणां गुणैः ज्ञानादिभिः अत्यन्तं अभेदो, गुणैः चिन्तादिभिः भेदसहितोऽभेदः। मुक्तौ तु सर्वशोऽपि गुणाद्यैः अत्यन्ताभेद एव इति योजनीयम्॥)



CC0. In Public Domain. Digitized by Muthulakshmi Academy

(आ) 'स्वाध्यायस्तत्त्वविज्ञानं विष्णुभक्तिर्विरागता।
निषिद्धकर्मसंत्यागो विहितस्य सदा क्रिया॥७॥
सदा विष्णुस्मृतिश्चैव केवलं मोक्षसाधनम्।
एतैर्विना न मोक्षः स्याद् भवेदेतैरपि ध्रुवम्॥८॥
ऋषिच्छन्दोदैवतानि ज्ञात्वार्थं चैव भक्तितः।
स्वाध्यायेनैव मोक्षः स्याद्विरक्तस्य हरिस्मृतेः॥९॥
जप्येनैव तु संसिद्ध्येद् ब्रह्मणो नात्र संशयः।
कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते ॥१०॥
तस्मान्नित्यं हरिं ध्यायन् कुर्यात्स्वाध्यायमञ्जसा।
ऐहिकामुष्मिका भोगा रक्तस्यान्यस्तु मुच्यते ॥११॥
इति स्वाध्यायवचनं भगवतोदितम् ॥१२॥
स्वाध्यायात्तु प्रवचने सहस्रगुणितं फलम्।
अर्थद्रष्टुः कोटिगुणं ततोऽनन्तं नियामके ॥१३॥
तर्कागमाभ्यां नियतिं यः करोत्यधिकं ततः।
पूर्णं वेदाखिलद्रष्टुर्ब्रह्मणः फलमुच्यते ॥१४॥'

(ज) एतैविना इत्युक्तमेव व्यतिरेकान्वयाभ्यां उच्यते। ऋषीति वचनान्तरम्। हरिविषया स्मृतिः यस्य असौ हरिस्मृतिः तस्य। जप्येनैवेति वाक्यान्तरम्। जप्येन उक्तलक्षणेन संसिध्येत् मुक्तो भवेत्। कुतः? मित्रदेवताकगायत्रीजपेनैव फलवत्त्वाद्धि मैत्रो ब्राह्मणः। तस्मात् इत्यादि स्वाध्यायाख्यग्रन्थगतं वाक्यम्॥

यथाश्रुतव्याख्यानादपि स्वयं अर्थद्रष्टुः अनन्तं अनन्तगुणम्। बहुतरगुणमिति यावत्। नियामके स्वोक्तार्थस्य परं प्रत्युपदेशयितरि। आप्तिमात्रेण उपपादकादपि तर्कागमाभ्यां नियतिं उपपादनं यः करोति तस्याधिकं फलम्॥ यदैवं वेदार्थद्रष्ट्रादिमात्रस्य महाफलं तदा ब्रह्मणः पूर्णं फलं वक्तव्यम्। वेदाखिलद्रष्टुः इति अखिलवेद तदर्थद्रष्टुः इत्यर्थः॥

(श्री) (उक्तं यत् स्वाध्यायादेः मोक्षसाधनत्वं तदेव अन्वयव्यतिरेकाभ्यां एतैर्विना इति वाक्येन उच्यते इति योज्यम्। छन्दो ज्ञानपूर्वकस्वाध्यायस्य मोक्षसाधनत्वोक्त्या छन्दोज्ञानस्योपयुक्तत्वेन इत्यर्थः। जप्येनैव इति, उक्तलक्षणेन इति। ऋषिच्छन्दोदेवताज्ञानभक्तिपूर्वकमनुष्ठितेन इत्यर्थः। फलं मोक्षम्॥

तर्कागमाभ्यां उपपादनशक्तिरहितः गुरूपदेशमन्तरेण स्वयमेव अर्थदर्शनेन सम्यग् विवक्षितार्थतत्वज्ञानवान् आप्तिमात्रेण उपपादकः इत्युच्यते। वेदाय द्रष्टत्वमात्रस्य इति। असमग्रवेदार्थ द्रष्टुः इत्यर्थः॥ नियामकत्वं चेति। तर्कागमाभ्यां नियामकस्य इति पूरणीयम्॥)

CC0. In Public Domain. Digitized by Muthulakshmi Academy

(आ) सूक्तं त्वनारतं प्रोक्तमनुवागेककालिका।
अन्यथात्वं च तत्र स्यादावापोद्वापतस्तृचाम् ॥१॥
वेदानन्ततत्वविज्ञप्त्यै तौ चक्रे बादरायणः ।
'ऋचः स ऋच उद्धृत्य ऋग्वेदं कृतवान् प्रभुः ॥२॥
यजूंषि निगदाच्चैव तथा सामान्ति सामतः।
एवं पुराणवचनादुद्धृता हि ततस्ततः ॥३॥
ऋचः शाखात्वमापन्नाः शिष्यताच्छिष्यकैरिमाः ।
मानस्तेनेंति पूर्वासु ह्यूनया दृश्यतेऽर्थतः॥४॥
शुनःशेपोदिताभ्यश्च पठ्यन्तेऽन्यत्र काश्चन।
अत्राप्यक्रमतो दृष्टिरिति नैकक्रमो भवेत् ॥५॥
अनन्तत्वात्तु वेदानां प्रायः कर्मानुसारतः।
संक्षेपं कृतवान् देवः शिष्याश्च तदनुज्ञया ॥६॥
अष्टकाध्यायवर्गादिभेदं च कृतवान् प्रभुः।
स्वाध्यायविश्रमार्थाय तस्मात् क्रमविपर्ययः॥७॥
तत्र तत्रैवान्तरिता दृश्यन्ते च खिला अपि।
यत्रार्थे न विशेषोऽस्ति पदान्तरितताऽत्र च।
यत्राल्पोऽपि विशेषोऽस्ति पदं नान्तरितं भवेत् ॥९॥

(at the end of 1,13,12)

(ज) तत्र सूक्तादि स्वरूपजिज्ञासायामाह। अनारतं प्रोक्तं निरन्तरं पठितम्। मूलवेदऋचां यः क्रमः तत्र ऋचोऽनन्तरिताः कृत्वा यावत्पठितं तावदुपवेदे सूक्तमुच्यते। ऋषिभिर्दर्शनसमये यावन्निरन्तरकाले दृश्यते साऽनुवाग् उच्यते। यद्वा एककालिका इत्यस्य विराममकृत्वा एकस्मिन् काले पठनीया इत्यर्थः॥ उक्तस्य अपवादमाह - अन्यथात्वं च इति। मूलवेदात् उद्धृतेषु ऋङ्निगदाद्युपवेदेषु यदानरत प्रोक्ततया सूक्तमुक्तं तत्र तस्य ततोपि उद्धृतेषु ऋग्वेदादिषु अवान्तर वेदेषु अन्यथात्वं च स्यात्। कथं? ऋचां अवापोद्वापरूपेण तत्क्रमपठितानां कासांचिद् ऋचां उद्वापः स्थानान्तरस्थानां तत्रावापः। उपवेदगतसूक्तान्तर्गतऋक्प्रबन्धत्वेन अवान्तरवेदे सूक्तसंज्ञा इति ज्ञातव्यम्॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy



अवापोद्वापकरणे को हेतुः? इत्यत आह-वेदेति। इदं तु वक्ष्यमाणविवरणानुसारेण प्रतिपत्तव्यम्। भवेदेतत् यदि मूलवेदात् उपवेदानां, ततोऽवान्तरवेदानां च उद्धारेण प्रबन्धनिर्माणँ प्रामाणिकं स्यात्, तदेव कुतः? इत्यत आह-ऋच इति। ऋङ्निगदसामानीति मूलवेदादुद्धृता उपवेदा उच्यन्ते। ततो मूलवेदात् उपवेदाः ततश्च अवान्तरवेदा उद्धृता इत्येतदेवं पुराणवचनादवगम्यते॥ यथोपवेदादिप्रबन्धः कृत्रिमः, एवं शाखाप्रभेदोऽपि? इत्येतत्प्रसङ्गात् आह-ऋच इति। ऋच इति प्रस्तुतत्वादुक्तम्। यजुरादिकं च एवं ज्ञातव्यम्।

(श्री) (एको मूलवेदः। तस्मादुद्धृत उपवेदः। तत उद्धृत अवान्तरवेदः। तस्मात् पुनः चतुर्विंशत्यादिशाखाभेदः। इत्येवं ऋगादिसर्ववेदेष्वपि स्थितिरस्ति। तत्र उपवेदे सूक्तं नाम कीदृशम्? इत्याशङ्कायां तन्निरूपणार्थं सूक्तमित्यादिभाष्यं प्रवृत्तम्। तदर्थमाह - अनारतं इति। तत्र क्रमवतां ऋचां मध्ये विद्यमाना ऋचः निरन्तराः अव्यवहिताः। ननु वेदद्रष्टॄणां ऋषीणां दर्शनसमये एककाले यावदृचां दर्शनं भवति, तावदृचां समूहः अनुवाकः इत्येतद् अयुक्तम्? तथात्वे मधुच्छन्दसा निरन्तरकाले दृष्टशतार्चां अनुवाकत्वेन तस्य असमाप्तत्वात् अनुवाकः परिसमाप्त इति कथम्? इत्यतः प्रकारान्तरेण योजयति - यद्वा इति। विरामं मध्ये विरतिम्। एकस्मिन्नेव अवदानरूपकर्मकरणकाले पठनीयः। 'महाहविर्होता सप्त हविरध्वर्युः' इत्यारभ्य 'न पृथिव्यै स्वाहा' इत्यन्तः वाक्समुदायः अनुवाग् इत्यर्थः। एवं च मधुच्छन्दसा निरन्तरं ऋक्शतस्य दृष्टत्वेऽपि तन्मध्ये 'अग्निमीळे' इत्यारभ्य 'धियो विश्वा विराजति' इत्येतत् पर्यन्तानां त्रिंशदृचां एकस्मिन् कर्मविशेषे देवताह्वानाय मध्ये विरतिमकृत्वा पठनीयत्वेन अनुवाकसंज्ञया युक्तत्वात् अत्र अनुवाकः परिसमाप्त इति युक्तमिति भावः॥

निरन्तरकाले एकस्मिन्काले यावदृग्जातं पठितं उपवेदे। उक्तस्य इति। उपवेदगतसूक्तलक्षणस्य। नेदं सर्वत्र सूक्तलक्षणम्। किं तु उपवेदगतसूक्तस्य एव अवान्तरवेदत्वं यथा सूक्तसंज्ञा इत्याह। तत्र उपवेदे तस्य सूक्तस्य ततोपि उपवेदादपि तत्क्रमपठितानां मूलवेद गतक्रमेण पठितानां उपवेदगतानां ऋचां उद्वापः अवान्तरवेदेभ्यः इति शेषः। अवान्तरवेदेषु परित्यागः इत्यर्थः। स्थानान्तरस्थानां ऋचां तत्रावान्तरवेदे आवापः स्थापनं इत्यर्थः।

ननु कथं तर्हि अवान्तरवेदे सूक्तसंज्ञा? मूलवेदे ऋचो निरन्तराः कृत्वा यावत्पठितं, तावदुपवेदे सूक्तमितिवत्, उपवेदगता ऋचो निरन्तराः कृत्वा यावदृग्जातं पठितं, तावदवान्तरवेदे सूक्तमिति अस्य आवापोद्वापाङ्गीकारेण असंभवात्? इत्यत आह - उपवेदगतेति। उपवेदगत सूक्तान्तर्गतसमस्त

CC0. In Public Domain. Digitized by Muthulakshmi Academy

ऋक्प्रबन्धत्वं इह अवान्तरवेदसूक्तत्वं इति न उच्यते, येन अवापोद्वापस्थले अव्याप्तिः स्यात्। किं नाम उपवेदगत सूक्तान्तर्गत कर्मबद्धत्वमेव इह अवान्तरवेदसूक्तावच्छेदकं विवक्षितम्। इदं च उपवेदगतऋक्समुदायवतः आवापोद्वापाभ्यां च पठित ऋग्वेदो अवान्तरवेदगतसूक्तस्यापि निरुक्त सूक्त तावच्छेदकाक्रान्तत्वात् न अव्याप्तिः इत्याशयः। अत्र तु अवान्तरवेदगतसूक्तगता ऋचः सर्वा अपि निरन्तरोपवेदगत सूक्तस्था एव। तत्र तु स्पष्टमिदं लक्षणमस्तीति न कोऽपि दोषः इति द्रष्टव्यम्॥

आवापोद्वापकरणयोः कथं वेदानन्तत्वज्ञापकत्वं? इत्यत आह-इदं तु इति। वक्ष्यमाणेति। अनन्तत्वात् वेदानां इति वक्ष्यमाणे। अशक्तानुग्रहार्थं तयोः कृतत्वात् इति विव्रीयमाणत्वात् इति ज्ञातव्यम्। उपवेदा उच्यन्त इति। ऋचः मूलवेदोद्धृतोपवेदात् काश्चन ऋच उद्धृत्य ऋग्वेदं अवान्तरवेदं कृतवान्। एवं निगदात् मूलवेदात् उद्धृतात् अच्छन्दोबद्धवाक्यत्वेन निगदशब्दवाच्यात् यजर्वेदाख्योपवेदात् यजूंषि उद्धृत्य यजुर्वेदमवान्तरवेदं कृतवान्। तथा सामतः मूलवेदात् उद्धृतात् उपवेदात् सामानि उद्धृत्य सामवेदाख्यमवान्तरवेदं कृतवानिति योज्यम्॥

पुनश्चतुर्विंशत्यादि शाखाभदेविभागोऽपि द्रष्टव्यः॥)

(ज) एवमवापोद्धारावुपपाद्य तत्र लिङ्गं च दर्शयति मानः इति।... ... अक्रमतो दृष्टिरवान्तरवेदे यः क्रममुल्लंघ्यैव मधुच्छन्दसो दृष्टिरित्यर्थः। यद्वा मूलवेदोपवेदयोः यः क्रमः तं उल्लंघ्यैव अवान्तरवेदेऽत्र माधुछन्दसो प्रकरणे ऋचो दृश्यन्ते। इति न एकक्रमो भवेत् मूलवेदोपवेदावान्तरवेदेषु इति शेषः। वेदानन्तत्वविज्ञप्त्या आवापोद्वापाभ्यां संक्षेपः कृतः इत्युक्तं तदसत्। अनन्ता वै वेदाः इत्यादिना एतज्ज्ञप्तिसंभवात् इत्यत उक्तं विवृणोतीति। अनन्तत्वात् इति। अनन्तत्वात् उक्तप्रकारेण कर्मकरणशक्तेः इति शेषः। इतश्च न मूलवेदादिषु एकप्रकारता इत्याह - अष्टकेति।

मूलवेदादौ अविद्यमानमेव इति शेषः॥

(श्री) (तथा च वेदानन्तत्वविज्ञप्त्यै तौ चक्रे बादरायणः इति वचनस्य अवापोद्धार करणेन अनन्तत्वज्ञप्तिर्भवति इत्येतावन्मात्रज्ञापने न तात्पर्यम्। किंतु वेदानां अनन्तत्वेन तदुक्तकर्मकरणे प्राणिनां अशक्तत्वात् आवापोद्वापकरणे तु वेदस्य अल्पता प्राप्त्या, तदुक्तप्रकारेण कर्मानुष्ठानं सुकरं भवतीत्यत्र तात्पर्यात् न दोष इति विवरणं कृतम्॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

स्वाध्यायविश्रमार्थाय इति वचनेन। स्वध्याय विश्रमार्थाय इत्यनेन स्वाध्यायाभ्यासप्रयुक्तश्रमपरिहाराय तत्र तत्र विरत्यर्थं अष्टकाध्यायवर्गादिभेदस्य कृतत्वेन वर्गसंज्ञायाः सांकेतिकत्वेन कृत्रिमतया तत्स्वरूपं नोक्तमित्यर्थः। सामयिक एवेति सांकेतिक एवेत्यर्थः॥)

(रा) (श्रीराघवेन्द्रतीर्थविरचितश्रीमन्मन्त्रार्थमञ्जर्यां

वेदस्य मूलवेदोपवेदावान्तरवेदरूपेण त्रैविध्यात् मूलवेदे ऋचां यः क्रमः तत्रर्चोऽनन्तरिताः कृत्वा यावत्पठितं तावदुपवेदे सूक्तमुच्यते। उपवेदगतसूक्तान्तर्गतऋक् प्रबन्धोऽवान्तरवेदे सूक्तमिति ज्ञेयम्। 'सूक्तं त्वनारतं प्रोक्तम्' इत्युक्तेः। वर्ग इति तु साङ्केतिकं नाम॥)



CC0. In Public Domain. Digitized by Muthulakshmi Academy

श्रीराघवेन्द्रयतिविरचिता

## ॥ मन्त्रार्थमञ्जरी ॥ उपोद्घातः ॥



हरिः ओ३म्॥

अशेषगुणसम्पूर्णं सर्वदोषविवर्जितम्।
अनन्ताम्नायसंवेद्यं वन्देऽहं कमलापतिम्॥
प्रणम्य श्रीमदानन्दतीर्थादिगुरुशेखरान्।
संग्रहीष्यामि ऋग्भाष्यप्रोक्तान् अर्थान् ऋचां स्फुटम्॥

(ग्रन्थकारप्रतिज्ञा)

ऋक्शाखागतैकोत्तरसहस्रसूक्तमध्ये कानिचिच्चत्वारिंशत्सूक्तानि भगवत्पादैः अग्न्यादिदेवतापरत्वेन, तदन्तर्गतविष्णुपरत्वेन, अध्यात्मपरत्वेन, चेत्येवं त्र्यर्थपरतया व्याख्यातानि॥

(आक्षेपः)

तत्रैके चोदयन्ति - तत्तत्कर्मणि विनियुक्तानां मन्त्राणां अर्थविवक्षावत्त्वस्य पूर्वतन्त्रीयाध्यायद्वितीयपादे 'तदर्थशास्त्रात्' (पूर्वमीमांसासूत्रे १,२,३) इति मन्त्राधिकरणे सिद्धत्वेन, मीमांसकाभिमतशब्दसामर्थ्य रूपलिङ्गेन तत्तत् प्रकारेण च तत्तत् देवतार्थकत्वमेव उचितम्। न तु विष्ण्वाद्यर्थत्वं इति॥ मानाभावात्।

CC0. In Public Domain. Digitized by Muthulakshmi Academy



अनेकार्थत्वस्य अन्याय्यताच्च। सर्वसूक्तानां विष्णुसूक्ततापत्त्या आग्नेय्यादिसूक्तव्यवस्थानुपपत्तेश्च। अनेकार्थत्वे तन्निबन्धनवाक्यभेदापत्तेश्च। अर्थैकत्वात् एवं वाक्यम्।' (तत्रैव २,१,४६) इति जैमिन्युक्त्या अर्थैकत्वनिमित्तकत्वात् एकवाक्यताया इत्यादि॥

(समाधानम्)

तत्र ब्रूमः। 'ओङ्कारस्तावद् ब्रह्मवाची', 'ओमिति ब्रह्म' (तैत्तिरीयोपनिषदि) इत्यादि श्रुतेः, 'ओं तत् सत् इति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः' (गीतासु., १२,२३) इत्यादि स्मृतेः ब्रह्म ओंकारवाच्यम्। गुणपूर्तिरूपोंकार प्रवृत्तिनिमित्तवत्त्वात्। यत् यच्छब्द प्रवृत्तिनिमित्तवत् तत् तच्छब्दवाच्यम्। यथा घटादिपदवाच्यं घटादिकमिति वा। ओङ्कारो ब्रह्मवाची। तन्निष्ठधर्मप्रवृत्तिहेतुकत्वात्। सामान्यव्याप्त्या संमतवदिति वा। इत्यनुमानाच्च॥

'ओतत्त्ववाची ह्योंकारः' इत्यनुव्याख्यान (१,१,१) सुधयोः ओंकारस्य गुणपूर्तिनिमित्तकत्वम्। ब्रह्म च गुणपूर्णमिति, तदेव विष्णुरिति च व्यक्तम्। वेदाश्च ओंकारस्य व्याख्यानम्। 'ओंकारेण सर्वा वाक् संतृण्णा' इति छन्दोगश्रुतेः (छा० उ० २,२३)। तथा च विष्णुः सर्ववेदप्रतिपाद्यः। तद् व्याख्येयोंकारार्थत्वात्। यो यद्व्याख्येयार्थः स तद्व्याख्यानप्रतिपाद्यः॥

यथा संमत इति वा॥ वेदा विष्णुपराः। विष्णुपरोंकारव्याख्यानत्वात्। यो यत्परशब्दव्याख्यानं स तत्परः। यथासंमत इति वा इत्यनुमानेन सर्ववेदानां विष्ण्वर्थसिद्धेः। मानाभावात् इति अयुक्तम्॥

वेदानां ओंकारस्य व्याख्यानव्याख्येयभावश्च साक्षादेव वा, अनुव्याख्यानऋग्भाष्ययोः उक्तदिशा व्याहृतिगायत्रीपुरुषसूक्तद्वारा वा इति ध्येयम्॥

किंच -

'अदुःखमितरत् सर्वं जीवा एव तु दुःखिनः।
तेषां दुःखप्रहाणाय श्रुतिरेषा प्रवर्तते॥'

(परमश्रुतौ)

इति श्रुतेः जीवानां दुःखप्रहाणरूप-बन्धनिवृत्तिलक्षण-मोक्षार्थं प्रवृत्तत्वात्। सत्यबन्धनिवृत्तेश्च, 'यस्य प्रसादात्' (नारायणीये) इत्यादि श्रुत्या राजप्रसादसाध्यनिगडबन्धनिवृत्तिदृष्टान्तेन च परमपुरुषप्रसादसाध्यत्वात्। प्रसादस्य च 'प्रियो हि ज्ञानिनोऽत्यर्थम्' (गीतासु ७,१७) इत्यादिना

CC0. In Public Domain. Digitized by Muthulakshmi Academy

ज्ञानसाध्यत्वात्। शास्त्रैकसमधिगम्यपुरुषज्ञानस्य च वेदैरेव उत्पाद्यत्वात् वेदानां विष्ण्वर्थत्वसिद्धिः॥ तथा च प्रयोगः॥

सर्वे वेदा विष्णुज्ञानजनकाः। तत्साध्यमोक्षार्थं प्रवृत्तत्वात्। यो यत् साध्ययदर्थं प्रवृत्तः स तज्जनकः। यथा घटादिज्ञानसाध्यघटादिव्यवहारार्थं प्रवृत्तो घटादिशब्द इत्यादिरूपेण वा। ध्येयः ॥अपि च न आपातप्रतीत एव श्रुत्यर्थः। तथात्वे कर्मतन्त्रे नामपादीय चित्राज्याधिकरणे (पू० म० १,४,३) 'आज्यैः स्तुवते' इतिवाक्यस्थाज्यपदस्य 'यदाजमीयुस्तदाज्यानामाज्यत्वम्' इति वाचनिकनिरुक्त्यादिबलेन मन्त्रार्थत्वं नोच्येत। ब्रह्मतन्त्रे च आकाशाधिकरणादौ (वे० सू० १,१,२२) 'आकाश इति होवाच' (छान्दोग्ये १,७) इत्यादिवाक्यस्थ आकाशादिशब्दस्य 'स एष परोवरीयान् (तत्रैव उ० १,७) इत्यादिवाक्यशेषस्थलिङ्गादिबलेन विष्ण्वर्थं व उच्येत। किं तु मीमांसित एव॥

मीमांसा च उपक्रमोपसंहाराभ्यासापूर्वताफलार्थवादोपपत्तीनां श्रुतिलिङ्गवाक्य प्रकरणस्थानसमाख्यानां चानुगुण्यानुसन्धानम्। उपपत्तिश्च मानान्तरोपबृंहितत्व मानान्तरविनियुक्तत्वादिका प्रागुक्तानुमानरूपा च, 'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।' (उदाहृतस्मृतिः) इत्यादेः॥

तथा च, अग्न्यादिशब्दानां निगमनिघण्ट्वादिरूपानुशासनबलेन आग्नेयादिकर्मादिसिद्धिरूपप्रयोजनबलेन च प्रसिद्धाग्न्यादौ इव 'ॐ चमसवदविशेषात्' (१,४,९) इत्यादौ भाष्योक्तदिशा-

'नामानि सर्वाणि यमाविशन्ति
तं वै विष्णुं परममुदाहरन्ति॥
(भाल्लवेये)

इति,

'हन्तैतमेव पुरुषं सर्वाणि नामान्यभिवदन्ति॥'
(वेदान्तसूत्रभाष्ये १,४,२४ उदाहृतवाक्यम्)

इति,

'सर्वनामा सर्वकर्मा सर्वलिङ्गः।'
(म० उ०)

इति,

CC0. In Public Domain. Digitized by Muthulakshmi Academy



'यो देवानां नामधा एक एव।'

(ऋग्वेदे १,९२,३)

इत्यादिश्रुतिभिः,

'सर्वच्छन्दाभिदो ह्येष सर्वदेवाभिदो ह्यसौ।

(वामनपुराणे)

इत्यादिस्मृतिभिश्च सामान्यतः

'इन्द्रं मित्रं वरुणमग्निमाहुरथो
दिव्यः स सुपर्णो गरुत्मान्।'

(ऋग्वेदे १,१६४,४६)

इति,

'यमिन्द्रमाहुर्वरुणं यमाहुर्यं
मित्रमाहुर्यमु सत्यमाहुः।'

(आ० उ० भा० २ उदाहृतवाक्यम्)

इत्यादि श्रुतिभिः,

'बृंहणाद् ब्रह्मनामासौ ऐश्वर्यादिन्द्र उच्यते।
एवं नानाविधैः शब्दैरेक एव त्रिविक्रमः।
वेदेषु सपुराणेषु गीयते पुरुषोत्तमः॥'

(ब्रह्माण्डपुराणे)

इत्यादि स्मृतिभिश्च विशिष्यानुशासन रूपाभिः विष्णावपि शक्तेः सिद्धत्वेन विष्ण्वर्थत्वस्यापि मन्त्रेषु न्याय्यत्वात्॥

एवं हि तत्त्वविदां मतम् - द्विविधा हि अग्न्यादि शब्दाः। नीरसंवलितक्षीरवत्, अयः पिण्डसमारूढवह्निवच्च। अग्न्यादितत्तजीवचिता संवलितं यद् भगवच्चिद्रूपं विशिष्टं सपिण्डं यद्वाचिनः केचित्। केवल शुद्धचिद्वाचिनः केचित्। शुद्धचिद्वाचिनोऽपि क्वचित् भगवच्चिद्वाचिनो जीवचिद्वाचिनश्चेति द्वेधा॥

तत्र आद्याः 'अग्निमीळे' (ऋ० १,१,१) इत्यादौ प्रसिद्धाग्न्यादिदेवं विष्णुं च वक्ष्यमाणपरममुख्य-मुख्यवृत्तिभ्यां, 'गङ्गायां मीनघोषौ' इत्यत्र मुख्यामुख्यवृत्तिभ्यां प्रवाहतीररूपार्थद्वयं गङ्गापदमिव, 'राजा

CC0. In Public Domain. Digitized by Muthulakshmi Academy

कुवलयोल्लासी' इत्यादौ रूढियोगाभ्यां कुमुदभूवलयरूपार्थद्वयं कुवलयपदमिव, युगपदेव व्युत्पत्तिमतः प्रत्याययन्ति॥

अन्यास्तु 'अव्यक्तात् पुरुषः परः' (काठकोपनिषदि १,३,९९) इत्यादौ अव्यक्तादि पदं प्रकृतीश्वरौ इव 'शरीररूपकविन्यस्तगृहीतेः।' (१,४,१) इति न्याय्यात् 'अयमग्निर्वैश्वानरः' (७,९) इति काण्वश्रुत्यादौ भगवच्चिन्मात्रवाचिनस्तदेव प्रत्याययन्ति। 'इन्द्रस्यात्मा' (तैत्तिरीय-आरण्यके ३,११,३), 'वायोरात्मानम्' (तत्रैव ३,११,४) इत्यादौ, 'परिम्रियन्ते विद्युद् वृष्टिश्चन्द्रमा आदित्योऽग्निः' (एतरेयब्राह्मणे ५,९,२५) इत्यादौ 'भयादस्याग्निस्तपति' (काठकोपनिषदि २,३,३) इत्यादौ च केवलाग्न्यादि चिद्वाचिनः तन्मात्रमेव प्रत्याययन्तीति, तत्रापि तदधीनत्व न्यायानुसन्धाने (पू0 मीं0 १,४,३) तु विष्ण्वर्थत्वधीः अस्त्येव। उक्तं हि अनुव्याख्याने (१,४,११)-

'तेषु तेषु पदार्थेषु रूढिरङ्गीकृता यतः।
प्रयोजनबहुत्वेन तस्य तस्याविरोधतः॥
उपदेशादिसामर्थ्याद्विष्णौ शक्तिश्च गृह्यते।
तथाप्येन्द्रिरांधे तु तद्वाचित्वमपोद्यते॥'
इत्यादि, तथा 'स्वातन्त्रार्थमभिप्रेत्य दोषशब्दाश्च विष्णवि' (१,४,३) इति च॥



(आक्षेपः)

ननु च 'नामानि सर्वाणि' (भाल्लवेये) इति श्रुतिः अप्रसिद्धा? 'यो देवानां नामधा' (ऋग्वेदे १0, ५२, ३) इत्यादिका तु विश्वकर्मसूक्तस्था। कथं विष्णोः सर्वदेवनामवाच्यतया नामधारकत्वोक्तिपरा? सूक्तानां विष्ण्वर्थे विवदमानं प्रति तद्वाक्य विष्णुपरत्वासिद्धेः। अन्यथा अन्योन्याश्रयत्वात्। इति।

CC0. In Public Domain. Digitized by Muthulakshmi Academy



(समाधानम्)

इति चेत् मैवं वोचः - अर्वाचीनानां अप्रसिद्धत्वेऽपि अनेकशाखाभिज्ञभाष्यकाराद्युक्तवाक्ये श्रुतित्वासन्देहात्। अन्यथा शाबरभाष्यादौ औदुम्बराद्यधिकरणेषु 'ऊर्जपशूनाप्नोत्यूर्जोऽवरुध्य' इत्यवरुध्यान्तवाक्यस्य अप्रसिद्धस्य उक्तिः न स्यात्। परभाष्ये च 'ॐ अत एव चोपमा सूर्यकादिवत् ॐ' (३,२,१५) इत्यादौ 'नामधा' इति वाक्यं विश्वकर्मसूक्तस्थं इति तत्रोक्तः समाधिः - न आपातप्रतीत एव श्रुत्यर्थः, अपि तु मीमांसित एव इति॥

तथा च तत्र सूक्ते 'अजस्य नाभावध्येकमर्पितम्' (ऋग्वेदे १०,५२,६) इति वाक्यशेषोक्तेन

'अजस्य नाभाविति यस्य नाभेरभूच्छुतेः पुष्करं लोकसारम्।
तस्मै नमो व्यस्तसमस्तविश्वविभूतये विष्णवे लोककर्त्रे॥

इति स्कान्दस्मृतिसिद्धपद्मनाभत्व लिङ्गेन निरवकाशेन विश्वकर्मश्रुति सूक्तयोः विष्णौ दत्तपदत्वात्॥

न चैवमपि, 'तत्रापि यौगिको मुख्यः सर्वत्रास्ति स वैदिके' इति कर्ममिर्णयोक्त्या वक्ष्यमाणदिशा च विष्णौ शब्दानां यौगिकत्वात् योगात् रूढेः रथकाराधिकरणन्यायेन बलवत्तया, न मन्त्रेषु अग्न्यादिशब्दैः विष्णुधीः इति वाच्यम्। अज्ञरूढितो वाचनिकयोगस्य निरवकाशत्वेन 'आनर्थक्यप्रतिहतानां विपरीतं बलाबलम्' इति न्यायेन बलवत्त्वात्। अत एव 'ॐ कम्पनात् ॐ।' (वे० सू० १,३,३९) इत्यत्र 'महद्भयं वज्रमुद्यतम्' (काठकोपनिषदि २,३,२) इति वाक्ये वज्रशब्देन रूढ्या एव इन्द्रायुधस्य कृत्रिमाकृत्रिमयोः कृत्रिमस्य ग्राह्यत्वात्, 'यू स्त्र्याख्यौ नदी' इति सांकेतिक कृत्रिमाद्या एव 'अण्नद्याः' इत्यादौ ग्रहणमिव। अन्यथा संज्ञाकरणानर्थक्यात् इत्युक्तम्॥

तदुक्तं चन्द्रिकायाम् -

'श्रुत्यर्थनिर्णयार्थत्वात् स्मृतेस्तत्र निरूपितः।
अर्थो ग्राह्यो वेदवाक्ये तदभावे तु लौकिकः॥'

इति। अत्र वक्ष्यमाण-अग्न्यादिशब्दयोगस्य वेदव्यासकृतनिरुक्त्यादि स्मृतिसिद्धत्वात् इन्द्राग्न्यादिशब्दप्रवृत्तिनिमित्तस्य परमैश्वर्यादेः अनन्याधीनत्व-निरवधिकत्वाभ्यां 'न ते विष्णो जायमानो न जातः।' (ऋग्वेदे २,५,२) इत्यादि श्रुतिस्मृति बलेन विष्णौ एव मुख्यतः सम्भवेन योगस्य महायोगरूपत्वाच्च हरौ योगोऽपि बलवानेव। निमित्ताधिक्ये नैमित्तिकोत्कर्षस्य न्याय्यत्वात्।

CC0. In Public Domain. Digitized by Muthulakshmi Academy



किंच, 'इन्द्रं मित्रम्' (ऋग्वेदे १,१६४,४६) इत्यादि श्रुतौ ''आहुः'' इत्युक्तप्रयोगबाहुल्यरूपलिङ्गबलेन हरौ विद्वद्रूढेः अनुमानाच्च। सा च पूर्वतन्त्रस्थाद्याध्याय तृतीयपादीयव्यवहाराधिकरणोक्तदिशा अङ्गरूढितो बलवती, योगवृत्तौ अल्पत्व महत्वयोः शब्दप्रवृत्तिनिमित्तस्य अल्पत्वमहत्त्वाभ्यामेव सिद्धत्वात्। रूढौ अङ्गरूढिः विद्वद्रूढिः इति द्वैविध्यस्य तु 'ॐ समाकर्षात् ॐ।' (वेदान्तसूत्रे १,४,१६) इत्यधिकरणे चन्द्रिकादौ समर्थनात्॥

न च 'इन्द्रम्' (ऋग्वेदे १,१६४,४६) इत्यादिकं अभेदोक्तिपरम्। न शब्दवाच्यत्वोक्तिपरं इति वाच्यम्। ऐतरेयभाष्ये (१,१,२०)ऽन्तर्नयचन्द्रिकायां च अस्य निरासात्। अपि च ऐतरेये (२,२,१) 'तं यच्छतं वर्षाण्यभ्यार्चत्' इत्यादौ 'सर्वे वेदाः सर्वे घोषा एकैव व्याहृतिः प्राण एव प्राण ऋच इत्येव विद्यात्।' (२,२,२) इत्यन्तवाक्ये 'एतम्' इत्यनेन 'प्राणस्तम्' (२,१,५) इत्यत्र ब्रह्मत्वेन निर्णीतं, 'प्राणो ह्येष य एष तपति' (२,२,१) इति पूर्ववाक्यस्थं प्राणं परामृश्य पुष्कलावयवार्थोक्त्या महायोगेन ''आचक्षते'' इत्युक्त्या विद्वद्रूढ्या च लौकिकरूढि प्राबल्यप्रसक्तमन्येषां मुख्यत्वं अवधारणेन निरस्य, 'तस्माच्छतर्चिनस्तस्माच्छतर्चिन इत्याचक्षते' (२,२,१) इत्यादिरूपेण अभ्यासेन सतात्पर्यं विष्णौ सर्वशब्दमुख्यार्थत्वस्योक्तिपूर्वं सर्ववेदानां विष्णुपरत्वस्योक्तत्वेन मन्त्रेषु अग्न्यादौ अङ्गप्रसिद्धिमात्रेण विष्णुप्रतीत्यपहारो न शक्यः। तदुक्तमनुव्याख्याने -

'आचक्षत इति ह्यत्र सन्तमित्यवधारणात्।
योगस्य रूढेः प्राबल्यं विद्वद्रूढिं च तत्रगाम्।
बहुशो दर्शयत्यब्जस्तात्पर्यात् सनिरुक्तिगम्॥'

(१,४,११)

इति

'अव स्वराति गर्गरो गोधा परि सनिष्णवत्।
पिङ्गा परि चनिष्कददिन्द्राय ब्रह्मोद्यतम्॥

(ऋग्वेदे ८,६९,९)

इति श्रुतै गर्गरगोधादिशब्दानां अपि इन्द्रशब्दिते परमेश्वरे विष्णौ मन्त्रशास्त्रसिद्धनादरूपवर्णाभिव्यक्तिद्वारा वाचकत्वं उक्त्वा ब्रह्मशब्दार्थस्य वेदस्य विशिष्य तद्वाचित्वोक्तेश्च। न चेन्द्रशब्दः पुरन्दरपरः। प्रागुक्तमहायोगविद्वद्रूढिविरोधात्। इन्द्रस्य गोधादिशब्दवाच्यत्वस्य मुख्यतो वेदादि बोध्यत्वस्य च बाधाच्च।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

'मत्सि सोम वरुणं मत्सि मित्रं
मत्सीन्द्रमिन्दो पवमान विष्णुम्॥'

(ऋग्वेदे ९,९०,५)

इति सामानाधिकरण्येन विशिष्य इन्द्रशब्दस्य विष्णौ सिद्धत्वाच्च 'णकारो बलं षकारः प्राण आत्मा' (३,२,६) इति विष्णुशब्दान्तर्गत णकारषकारयोः बलचेष्टार्थकत्वं उक्त्वा 'स यो हैतौ णकार षकारावनुसंहितमृचो वेद' (३,२,६) इत्यैतरेयश्रुतौ णकारषकारार्थो वेदे सर्वत्र पूर्वोत्तरवर्णसंहितार्थं इत्युक्तत्वाच्च।

'अः इति ब्रह्म' (ऐतरेयश्रुतौ २,३,९) इति ब्रह्मवाचितयोक्तेनाकारेण सह सर्वशब्दानां समानार्थत्वस्य, 'अकारो वै सर्वा वाक्' (ऐतरेयोपनिषदि, २,३,६) इति श्रुतौ, 'अकारः सर्ववागात्मा परब्रह्माभिधायकः' (गरुडपुराणे) इति स्मृतौ चोक्तत्वाच्च।

'सृजतो हि ते श्रुतयोऽनुवर्तन्ते
नैवासृजतः कं वा विदधते
कं वा निषेधन्ति स्तुतिमात्रा एव ते स्युः॥'

इति श्रुतिगीतातात्पर्योक्तशाण्डिल्यश्रुतौ विध्यादिभागस्यापि भगवतः स्तुतित्वोक्तेश्च।

'यद्वै किञ्चैतदध्यगीष्ठा नामैवैतन्नाम वा
ऋग्वेदो यजुर्वेदः सामवेद आथर्वणश्चतुर्थः॥'

CC0. In Public Domain. Digitized by Muthulakshmi Academy

इत्यादिना, 'नामैवैतत्' इत्यन्तेन छान्दोग्ये सप्तमाध्याये नारदसनत्कुमारसंवादे

'यद्वाच ओमिति यच्च नेति यच्चास्याः
क्रूरं यदु चोल्बणिष्णु तद्वियूय कवयोऽ
न्वविन्दन्नामायत्ता समतृप्यञ्छृतेऽधि॥'

इत्यैतरेये च सर्ववैदिकशब्दानां भगवन्नामोक्तेश्च। तथा च सूत्रम् - 'ॐ संज्ञातश्चेत् तदुक्तमस्ति तु तदपि ॐ।' (वेदान्तसूत्रे ३,३,९) इति, 'सोऽहं भगवो नामविदेव' (छान्दोग्ये ७,१) इति श्रुत्या सर्वविद्यानां भगवत्संज्ञात्वात् भगवद्गुणाभिधायकत्वात् सर्ववेदोक्तगुणोपसंहारः कार्य इति चेत् तदुक्तं उपसंहारसूत्र इति व्याख्यानात्॥

अपि च, 'कश्छन्दसां योगमा वेद धीरः' (ऋग्वेदे १०,११४,९)

इति श्रुतौ,

'मां विधत्तेऽभिधत्ते मां
विकल्प्योऽपोह्य इत्यहम्।
इत्यस्या हृदयं साक्षान्
नान्यो मद्वेद कश्चन॥'

(भागवते ११,२१,४३)

इति स्मृतौ विधिभागदेवताभागादिरपि मामेव बोधयतीत्यर्थस्य दुर्ज्ञानत्वोक्तेश्च। 'नारायणपरा वेदा देवा नारायणांगजाः' इति द्वितीयस्कन्धपञ्चमाध्याये, 'वासुदेवपरा वेदा वासुदेवपरा मखाः' इति प्रथमस्कन्धद्वितीयाध्याये,

'वेदे रामायणे चैव पुराणे भारते तथा।
आदावन्ते च मध्ये च विष्णुः सर्वत्र गीयते॥'

(हरिवंशे)

इति स्मृतौ च सर्वत्र विष्णुपरत्वोक्तेश्च। 'वेदैश्च सर्वैरहमेव वेद्यः' (गीतासु १५,१५) इति अवधारणेन कृष्णेन स्वस्यैष परममुख्यत्वेन सर्ववेदप्रतिपाद्यतोक्तेश्च। 'सर्वे वेदा यत्पदमामनन्ति' (काठकोपनिषदि १,२,१५) इत्यत्राङ्गास्य मुख्यतोऽशेषवेदवेद्यत्वमुक्त्वा 'तद्विष्णोः परमं पदम्' (१,३,९) इत्युपसंहाराच्च काठके। समन्वयसूत्रे (वेदान्तसूत्रे १,१,४) सूत्रकृताप्यशेषवेदसमन्वयं हरौ प्रतिज्ञाय 'ॐ

CC0. In Public Domain. Digitized by Muthulakshmi Academy

आनन्दमयोऽभ्यासात् ॐ' (वेदान्तसूत्रे १,१,१२) इत्यादिना अध्यायेन तस्य प्रपञ्चनाच्च। 'ॐ ज्योतिश्चरणाभिधानात् ॐ' (तत्रैव १,१,२४) इत्यत्र अशेषसूक्तोपक्षकत्वेन,

'वि मे कर्णा पतयतो वि चक्षु -
र्वी३दं ज्योतिः'

इति (ऋग्वेदे ६,९,६) अग्निसूक्तस्य कर्णादिविदूरत्वादि रूपान्यत्रानवकाशविष्णुलिङ्गेन विष्णुपरत्व समर्थनाच्च॥

विष्ण्वर्थत्वे वेदानामपूर्वतारूपस्य तात्पर्यलिङ्गस्य प्रतीत्या मोक्षपरत्वाच्च। 'तात्पर्यं नैव दूषणे' (अनुव्याख्याने १,२,२) इत्युक्तदिशा -

'न तादृशी प्रीतिरीड्यस्य विष्णो-
गुंणोत्कर्षज्ञातरि यादृशी स्यात्।
तत्प्रीणनान्मोक्षमाप्नोति
सर्वस्ततो वेदास्तत्पराः सर्व एव॥'

इति सौपर्णश्रुत्या, 'प्रियो हि ज्ञानिनोऽत्यर्थमहम्' (गीतासु ७,१७) इति स्मृत्वा च विष्णुप्रतिपादने तज्ज्ञानसाध्यमोक्षाख्यमहाफलवत्त्वरूपस्य, 'यस्तन्न वेद किमृचा करिष्यति' (ऋग्वेदे १,१६४,३९) इत्यादेर्विपक्षे निन्दारूपार्थवादस्य च 'य इत् तद्विदुस्त इमे समासते' (तत्रैव, १,१६४,३९) इति स्तुतिरूपार्थवादस्य च भावाच्च॥ अनुक्रमणिकायामपि 'एकैव वा महानात्मा देवता' इति सर्वसूक्तानां परमात्मदेवतात्वस्योक्तत्वाच्च॥

(आक्षेपः)

यत्तु एवं सति विष्ण्वर्थत्वेनैवालम्। किं अग्न्यादिदेवतापरत्वेनापि? गौरवात्? इति।

(समाधानम्)

तन्न। 'ॐ कल्पनोपदेशात् ॐ' (तत्रैव १,४,११) इति सूत्रतात्पर्य निरूपणपरेऽनुव्याख्याने -

CC0. In Public Domain. Digitized by Muthulakshmi Academy



'तेषु तेषु पदार्थेषु रूढिरङ्गीकृता यतः।
प्रयोजनबहुत्वेन तस्य तस्याविरोधतः।
उपदेशसामर्थ्याद्विष्णौ शक्तिश्च गृह्यते॥'

इत्यत्र अग्न्यादि देवतास्वरूपसिद्धादिबहुप्रयोजनाय तत्तद्देवतार्थकत्वस्य अवश्यकत्वोक्तेः निगमनिघण्टुव्याकरणादिसिद्धव्युत्पत्तिलभ्याग्न्यादिदेवतार्थकत्वस्य त्यागायोगाच्च।

'त्रयोऽर्थाः सर्ववेदेषु दशार्थाः सर्वभारते।
विष्णोः सहस्रनामापि निरन्तरशतार्थकम्॥'

इति स्कान्दस्मृत्या त्र्यर्थत्वस्य उक्तत्वात्। 'ॐ अन्यार्थं तु जैमिनिः' (पूर्वमीमांसासूत्रे १,४,११) इत्यादौ सूत्रकृता ब्रह्मज्ञानार्थत्वेन कर्मदेवतारूपार्थान्तरस्य उक्तत्वाच्च॥

ननु एवं 'नामानि विश्वाभि न सन्ति लोके' (भाल्लवेये) इति श्रुतौ अन्यस्य वाच्यत्वनिरासपूर्वकं विष्णुवाचित्वोक्तिविरोधः? तथा 'वेदैश्च सर्वैरहमेव वेद्यः' (गीतासु १५,१५) इति स्मृतौ अवधारणोक्तिविरोधः? तथा, 'ॐ तत्तु समन्वयात् ॐ' (वेदान्तसूत्रे, १,१,४) इत्यत्र अवधारणार्थक तु-शब्देन विष्ण्वाख्यं ब्रह्मैव सर्वशास्त्रप्रतिपाद्यं इति प्रतिज्ञाय, 'ॐ आनन्दमयोऽभ्यासात् ॐ' (तत्रैव १,१,१२) इत्यदिना, 'ॐ एतेन सर्वे व्याख्याता व्याख्याताः ॐ' (तत्रैव १,४,२९) इत्यन्तेन प्रतिनयं समन्वयसूत्रात् (१,१,४) 'तत्तु' इति पदं अनुवृत्य आनन्दमयादिशब्दार्थो विष्णुरेव, इन्द्रादिशब्दार्थो विष्णुरेव, आकाशप्राणाग्निसूक्तस्थज्योतिरादि शब्दार्थो विष्णुरेव, इति प्रमाणोक्तिपूर्वं सर्वशब्दानां विष्णुमात्रार्थत्वसमर्थनाच्च तद्विरोधः। वैश्वानरनये (१,२,२४) वैश्वानरनामसूक्तादिसर्ववैश्वानरविद्यासु,

CC0. In Public Domain. Digitized by Muthulakshmi Academy



ॐ अत एव न देवता भूतं च ॐ' (तत्रैव १,२,२७) इति सूत्रकृता कण्ठरवेण एव अन्यस्य प्रतिपाद्यत्वनिरासात् तद्विरोधश्च। 'तमेवैकं जानथ आत्मानमन्यो वाचो विमुञ्चथ' (आ० उपनिषदि ४,५), इत्यन्यस्य ज्ञेयत्वनिरासविरोधश्च। अत एव अन्यप्रतिपादनस्य क्वापि अनभिमतत्वादेव 'अनाद्यनन्तं महतः परं ध्रुवम्' (काठकोपनिषदि १,३,१५) इति वाक्ये महत्परत्वलिङ्गेन प्रधानं प्रतिपाद्यत इति प्राप्ते, 'ॐ ज्ञेयत्वावचनाच्च ॐ' (वेदान्तसूत्रे १,४,४) इति सूत्रे मुमुक्षुज्ञेयत्वं क्वापि विष्णोरन्यस्य न उच्यत इत्युक्तम्।

(समाधानम्)

इति चेत् मैवम्। मुख्यवृत्त्या अन्यार्थकत्वेऽपि परममुख्यवृत्त्या एव अन्यार्थकस्य श्रुतिसूत्रादौ निरासात्। 'अन्या वाचो विमुञ्चथ' (आ० उपनिषदि ४,५) इत्यादि श्रुतिसूत्रयोः प्राधान्येन अन्यस्य ज्ञेयत्वनिरासपरत्वोपपत्तेः। अत एव 'ॐ अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ॐ' (वेदान्तसूत्रे ३,३,५७) इति उपासनापादीयाधिकरणे ब्रह्मरुद्रेन्द्रमित्रावरुणाद्यङ्गदेवतावबद्धाः तद्विषया इति यावत्, उपासना नमनपूजनमननादयः कर्तव्या इत्युक्त्वा 'ॐ मन्त्रादिवद्वाऽविरोधः ॐ' (तत्रैव ३,३,५८) इति गुणसूत्रे यथाऽधमदेवतापरमन्त्राः तदुत्तमदेवतापरत्वेन ज्ञेयाः, तथाऽधमदेवतागुणाः तदुत्तमदेवतासु ज्ञेया ध्येयाश्च, उत्तमदेवतागुणा अधमदेवतासु न ध्येया न ज्ञेयाश्च, यथा उत्तमदेवतापरत्वेन प्रतीता मन्त्रा अधमदेवतापरत्वेन न ज्ञेयाः तथा इति च उक्तम्॥

न च अनेकार्थत्वे वाक्यभेदः। 'ॐ समाकर्षात् ॐ' (तत्रैव १,४,१६) इति नयसिद्धेन परममुख्य मुख्यवृत्तिभेदेन विष्ण्वर्थत्व तदन्यार्थत्वयोः अभ्युपगमात्। तुल्यवृत्त्या अनेकार्थत्वे अक्षादिशब्दवत् अनेकार्थत्वापत्त्या वाक्यभेदादि दोषः स्यात्। तदुक्तं अनुव्याख्याने (१,४,११) -

'तस्मात्परममुख्यत्वं विष्णौ
अन्यत्र मुख्यता॥'

इति॥

अत एव न सूक्तस्य व्यवस्थानुपपत्तिदोषः। अग्न्यादिदेवतापरत्वस्यापि सत्त्वेन अग्न्यादिसूक्तव्यवस्थोपपत्तेः॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy



न चैवं उभयत्र तात्पर्ये तात्पर्यभेदात् तन्निबन्धनवाक्यभेदः शंक्यः। महातात्पर्यार्थस्य एकत्वात्।

'सर्वेत्कर्षे देवदेवस्य विष्णो-
महातात्पर्यं नैव चान्यत्र सत्यम्।
अवान्तरं तत्परत्वं तदन्यत्
सर्वागमानां पुरुषार्थस्ततोऽतः॥'

- इति पैङ्गिश्रुतौ,

'सर्वज्ञं सर्वकर्तारं नारायणमनामयम्।
सर्वोत्तमं ज्ञापयन्ति महातात्पर्यमत्र हि॥'
सर्वेषामपि वेदानामितिहासपुराणयोः।
प्रमाणानां च तदर्थं चान्यदुच्यते॥'

इत्यादि नारदीयपुराणादौ च महातात्पर्य-अवान्तरतात्पर्य भेदेन अनेकार्थकत्वोक्तेः। अग्न्यादिसूक्तैः भगवदुपासकानां अग्न्याद्यधिष्ठानेषु एव भगवतोऽनुस्मर्तव्यत्वाभिव्यज्यमानत्वरूपनिमित्तत्रयेण 'इदमग्निसूक्तम्', 'इदं वायुसूक्तम्' इत्यादि व्यवस्थायाः वैश्वानर नयान्ते (वेदान्तसूत्रे १,२,२४) सूत्रकारेणैव समर्थनाच्च॥

न चैवं सौर-सावित्रादिसूक्तभेदायोगः, हरिसूक्तविष्णुसूक्तादिभेदायोगश्च। तत्र भगवदभिव्यक्त्यादिकं प्रत्यधिष्ठानभेदस्याप्यभावात् हरिसूक्तादौ अधिष्ठानस्यैव अभावात् इति शंक्यम्। एवं तर्हि

'पृथग्रूपाणि विष्णोस्तु देवतान्तरगाणि च।
अग्न्यादिसूक्तवाच्यानि नाम्ना सूक्तभिदा भवेत्॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

इति ऋग्भाष्योक्तदिशा अग्र्यादिमानभेदात् अग्र्यादिसूक्तव्यवस्थास्तु। यापि इदमग्निसूक्तमेव न तु विष्णुसूक्तं इत्यदि अध्यापकप्रसिद्धिः, सापि हि सूक्तव्यवस्थापकविष्ण्वादिनाम्नां व्यवस्थितत्वेन अग्र्यादिसूक्तेषु अभावात् 'इदं हि हरिसूक्तं न तु विष्णुसूक्तं' इति प्रसिद्धवदज्ञानमूलेति 'ॐ ज्योतिश्चरणाभिधानात् ॐ' (वेदान्तसूत्रे १,१,२४) इत्यत्र चन्द्रिकोक्तदिशा युक्ता।

यद्यपि अग्र्यादिसूक्तानां विष्ण्वर्थकत्वेऽभिमते सति 'नारायणो वा इदमग्र आसीत्' इत्यादिवदिव 'अग्निमीळे पुरोहितं', 'विष्णवायाहि दर्शत' इत्यादि रूपेण प्रसिद्धविष्ण्वादिशब्दप्रयोगः स्यादिति चोद्यम्। तदपि अग्र्यादिदेवता परत्वस्यापि सत्त्वाद् अग्र्यत्वादिशब्दप्रवृत्तिनिमित्त अग्र्यत्वादिगुणविशिष्टत्वेन उपासनार्थं अग्र्यादिशब्दप्रयोगः इति च्छन्दोनये (१,१,२५) सूत्रकृतैव 'तथा चेतोर्पणनिगदात्' (१,१,२५) इति समाधानाद्वा निरस्तं ध्येयम्॥

न चात्रोपासनाया अश्रवणमाशंक्यम्। 'ईळे' इत्युक्तस्तुतेर्गुणानुसंधानपूर्वकत्वात्। 'ॐ आध्यानाय प्रयोजनाभावात् ॐ' (वेदान्तसूत्रे ३,३,१५) इति न्यायाच्च। तत्र हि सर्वत्र गुणोक्तेः प्रयोजनान्तराभावेन आध्यानार्थत्वज्ञानार्थत्वयोः उक्तेरिति संक्षेपः॥

॥इति श्रीमन्मन्त्रार्थमञ्जर्यां उपोद्घातः समाप्तः ॥श्रीः॥



CC0. In Public Domain. Digitized by Muthulakshmi Academy

## APPENDIX

The excerpt that follows is from *Vedaprakāśa* by Satya-Jñānānanda tīrtha who lived around 1660 A.D) This is a digest of the Mīmāmsā-śāsrtra, and collects traditional information regarding the authenticity of the Vedic corpus. It also provides an account of the *Pūrva-Mīmāmsā-sūtras,* explaining the sacrificial orientation of the Vedic corpus. This is the first chapter of this book, and has been edited here. The major references in the text have been identified, and given in their places. The abbreviations are indicated below :

| | |
|---|---|
| ASS | Āpastamba-śrauta-sūtra |
| Bru | Bṛhadāraṇyaka-upanishad |
| CHU | Chhāndogya-upanishad |
| KS | Kāṭhaka-samhitā |
| MSS | Mīmāmsā-sangraha (Śaṁkara-bhaṭṭa) |
| MS | Maitrāyaṇīya-samhitā |
| Mus | Manu-smṛti |
| N | Nirukta (Yāska) |
| PMS | Pūrva-mīmāmsā-sūtra |
| SB | Śābara-bhāshya on PMS |
| SD | Śāstra-dīpikā (Pārthasārathi-miśra) |
| SK | Sāmkhya-Kārikā |
| SV | Śloka-vārtika (Kumārila-bhaṭṭa) |
| TA | Taittirīya-āraṇyaka |
| TB | Tāṇḍya-brāhmaṇa |
| TS | Taittirīya-samhitā |
| TV | Tantra-vārtika (Kumārila-bhaṭṭa) |
| YS | Yājñavalkya -smṛti |

CC0. In Public Domain. Digitized by Muthulakshmi Academy

धर्म

## VEDA-PRAKĀŚA

The author starts with a discussion of the injunction that one must study without fail the Veda. The study must be done with the help of the Vedāṅgas, with a view to understand clearly and fully the import of the Veda so as to facilitate the proper performance of the rituals indicated therein. The rituals enjoined in the Vedic texts are collectively called dharma, and mīmāmsā as an exegesis of the Vedic corpus naturally inquires into the nature of dharma, which is the import of the Vedic corpus (vedārtha). Jaimini therefore begins his *Pūrva-mīmāmsā-sūtra* with the aphorism ; 'athāto dharma-jijnāsā'. The author sets about to explain this sūtra; 'atha' is in the sense of "then" ; 'atah' refers to the reason: and 'dharma-jijñāsā' is desire to know for the sake of dharma.

इह खलु 'स्वाध्यायोऽध्येतव्य' इति नित्याध्ययनविधिना विधि–वदधीतस्सा ङ्गस्वाध्यायं निष्पापंद्विजातिमापाततो ऽधिगतवेदार्थं निस्सान्दिग्धतयावेदबोधित धर्मानुष्ठानार्थं तं जिज्ञासुमुपलभमानो भगवान् जैमिनिराचार्यः सर्वशास्त्रोपोद्घातर रूपं बह्वर्थमतिगम्भीरं इदं सूत्रमादौ स्फुटमुच्चारयामास–'अथातोधर्मजिज्ञासे' ति॥

अत्राथशब्द आनन्तर्यार्थः ।

अतःशब्दो हेत्वर्थः ।

ज्ञातुमिच्छा जिज्ञासा, धर्माय जिज्ञासा धर्मजिज्ञासा ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

## चोदना

अत्र धर्मानुष्ठानपर्यवसायि धर्मज्ञानं विवक्षितम् ।

न हि केवलं धर्मज्ञानमात्रंपुरुषा र्थपर्यव सायि भवितुमर्हति,

येन तावतैव कृतार्थःस्यात्, किन्तु धर्मानु ष्ठानद्वारा ।

तथेच्छाशब्देन विचारो विवक्षितः, शास्त्रस्य विचारात्मकत्वात् ।

धर्मशब्देन कृत्स्नो वेदार्थो विवक्षितः निषेधवाक्यार्थाधर्मस्यापि प्रतिपिपादयि षितत्वाद्धानाय ॥

तथा चा ऽ यं सूत्रार्थः सपन्नः :-

वेदाध्ययनानन्तरं वेदाध्ययनस्य तदर्थ ज्ञानाङ्गत्वात्, ज्ञानस्य च धर्मानुष्ठानहेतु त्वात् तस्य च साक्षात्पुरुषार्थहेतुत्वात् तदर्थिभि र्धर्माधर्मज्ञानाय वेदार्थविचारः कर्तव्य इति ।

सा च धर्मजिज्ञासा चतुर्विधा धर्मस्वरूपप्र माणसाधनफलै : ।

**This inquiry into dharma assumes four dimensions:**

1) The nature of dharma ;
2) The authority for it ;
3) The means to attain it ; and
4) The fruits of dharma

There occurs a natural doubt why at all should one inquire to know all these, when all that one would profit by knowing is the total import of the Veda. The reply is that this is necesary as a preliminary. Inquiry or examination is the sprit that is ingrained in the Vedic corpus.

CC0. In Public Domain. Digitized by Muthulakshmi Academy

धर्मस्वरूपप्रमाणसाधनफलैः ।

ननु अध्ययनविधिना वेदवाक्यार्थविचारः मात्राक्षेपाद्धर्मस्वरूपप्र–माणजिज्ञासयोः कः प्रसङ्गः? उच्यते – उपोद्घातत्वात्प्रसङ्गः।

यदि हि वेदवाक्यार्थो धर्मः प्रयोजनवान् स्यात्, वेदस्य तत्र प्रमाणम्, तदाऽसौ विचारः कर्तव्यो भवति ।

इतरथा काकदन्तपरीक्षावत्स्यात् ।

तस्मादध्ययनविधिरेव प्रमाणादिविचारमप्याक्षिपति अथातो वेदार्थमध्ययनं विदधत् ।

एतेन शास्त्रस्य वेदार्थविचारपरत्वात् अथातो वेदार्थजिज्ञासेति सूत्रं युक्तं तद्विचारेण धर्मोऽपि विचारितः स्यादिति शङ्का

परास्ता ॥

धर्मस्यैव साक्षात्पुरुषार्थहेतुत्वेन मुख्यवेदार्थत्वात् ।

यद्यपि धर्मार्थकाममोक्षख्याश्चत्वारः पुरुषार्थाः सेव्यत्वेन प्रसिद्धाः, तथापि काममोक्षयोरेव मरव्यं पुरुषार्थत्वम्, सार्वजनीनोत्कटेच्छाविषयत्वात्, इतरयोस्तु तद्धेतुत्वाद्गौणम्, तत्रापि मोक्षस्यैव उत्कृष्टता, नित्यत्वात् प्रेक्षावदिष्टत्वाच्च ।

एवं गौणयोरपि धर्मस्यैवोत्कृष्टतासाक्षान्मोक्षहेतुत्वात्,

अर्थस्य तु धर्मद्वारेति विवेकः ।

तथा चानेन सूत्रेण प्रारीप्सितस्य शास्त्रस्य श्रोतृप्रवृत्त्य ज्ञानुबन्ध चतुष्टयमप्रागप्यर्थात्सूत्रितं भवति ।

तत्राऽथातश्शब्दाभ्यामधिकारी सूचितः ।

धर्मजिज्ञासापदेन विषयप्रयोजने, तत्प्रतिपादकत्वाच्छास्त्रस्य प्रतिपाद्यप्रतिपादकसम्बन्धश्च सूचित इति बोध्यम् ।

Is this inquiry to be carried on immediately after the study of the Vedas is completed', even when he dwells with his master', or after he returns home ? The former is commended, for the inquiry is a part of Vedic stady.

CC0. In Public Domain. Digitized by Muthulakshmi Academy

अत्रेदं चिन्त्यते – किमध्ययनानन्तरं धर्मजिज्ञासया गुरुगृहा ऽ वस्थातव्यम् ? उत गुरूगृहात्समावर्तितव्यमिति ? किञ्चातः? यदि स्वाध्यायनविधिनाधर्मंमात्रमध्ययनं स्वर्गाय विधीयतेततस्तन्मात्रेणैव शास्त्रर्थस्य ''अधीत्य स्नया''दिति स्मृतिबलेन समावर्तितव्यम् । अथत्वक्षरादिग्रहणपरम्परोपजायमानवाक्या र्थज्ञानार्थमध्ययनं विधीयते ततस्तस्य विचारमन्तरेणासम्भवाद ध्ययनविधिनैवार्थाद्विचारोऽपि विहित इति गुरुगृह एवावस्थाय
धर्मो विचारयितव्यः ।

2) Jaimini considers the definition of dharma in the first adhikaraṇ. a of his work. This is summarized here in the conventional style of raising a doubt and answering it.

तत्र 'चोदनालक्षणोऽर्थो धर्म' इत्यारभ्य 'अन्वाहार्ये च दर्शनादि' इत्येतदन्तं जैमिनिप्रोक्तं सूत्रजातं धर्मविचारशास्त्रम्, तदेतस्य प्रथमाधिकरणस्य विषयः ।

The doubt concerns whether this inquiry is at all indicated, when the study of the Veda is itself sufficient to enable one to perform the rituals.

तत्रैवं संशयः किमिदं शास्त्रंविधिप्रयुक्त्यानारम्भणीयम् ? उतारम्भणीयम् ? इति ।
तत्र नारम्भणीयमिति तावत्प्राप्तम् ।
कुतः ? 'विनापि विधिना दृष्टलाभान्न हि तदर्थता।
कल्प्यस्तु विधिसामर्थ्यात्स्वर्गो विश्वजिदादिवत्' ऽइतिस्वाध्यायसंस्कारद्वारेणाऽध्ययनस्या र्थज्ञानहेतुत्वं विनैव विदिना प्रमाणान्तरेण सिद्धमिति तादर्थ्येविध्यानर्थक्यमिति प्राप्ते

CC0. In Public Domain. Digitized by Muthulakshmi Academy

This doubt is now cleared on the ground that inquiry also is insisted upon by the Veda

अभिधीयते—यथा दर्शपूर्णमासजन्यं परमापूर्वं अवघातनियमज—न्यस्यावावान्तरापूर्वस्य कल्पकम्, तथाशेषक्रतुजन्यमपूर्वजातं क्रतुज्ञानसाधनाध्ययनानियमजन्यस्यापूर्वस्य कल्पकं भविष्यति ।

नियमादृष्टानङ्गीकारेच श्रूयमाणो विधिरनर्थकः स्यात् ।

न च विश्वदजिन्न्यायेन (PMS, 4,3,7) स्वर्गर्यत्वं युक्तम्, दृष्टस्य कल्पयितुमशक्यत्वात् । (SD) अत एवोक्तम्—'लभ्यमाने फले दृष्टे नादृष्टपरिकल्पना ।

विधेस्तु नियमार्थत्वान्नाऽनर्थक्यं भविष्यती' ति ।

अतो विचारो वैधः ।

तस्माद्विधिवशादेव विचारशास्त्रमारम्भणीयमिति स्थितम् ।

अत्र श्रीशाबरं भाष्यम् — "वेदमधीत्य न त्वरितेन स्नातव्यम्'।

अनन्तरं धर्मो जिज्ञासितव्य इत्यथशब्दार्थः ।

अतःशब्दे । वृत्तस्याऽपदेशाको हेत्वर्थः ।

यथा क्षेमसुभिक्षोऽयं देशोऽतोहमस्मिन् देशे वत्सामीति ।

एवमधीतो वेदो धर्मजिज्ञासाया हेतुर्ज्ञातः, अनन्तरं धर्मोजिज्ञासितव्यइत्यत शब्दस्य सामर्थ्यम् ।

धर्माय हि वेदवाक्यानि विचारयितुमनधीतवेदो न शक्नुयात्, अत एतस्मात्कारणादनन्तरं धर्म जिज्ञासितुमिच्छेदित्यतः शब्दस्यार्थः ।

धर्माय जिज्ञासा धर्मजिज्ञासा ।

सा हि तस्य ज्ञातुमिच्छा, स कथं जिज्ञासितव्यः ? को धर्मः ? कान्यस्य साधनानि? कानि साधनाभासानि ?

किं परश्चेति ।

तत्र को धर्मः, कथं लक्षणक इत्येकेनैव सूत्रेणव्याख्यातम्—'चोदनालक्षणोऽर्थो धर्म' इति।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

कान्यस्य साधनानि, कानिसाधनाभासा नीति शेषलक्षणेन व्याख्यातम् ।
क्व पुरुषपरःस्तवं क्व वा पुरुषो गुणभूत इति चैतासां
प्रतिज्ञानां पिण्डस्यैतत्सूत्रम् 'अथातोधर्मजिज्ञासे'ति'' ।

The inquiry is carried on in this order: The Subject matter in the first chapter, the nature thereof in the second, the fruits thereof in the sixth, and the means thereof in the other chapters.

तत्सिद्धं वेदाध्ययनानन्तरंसमावर्तनात्प्राक् धर्मस्य प्रमाणस्वरूपफलसाधनैः क्रमेण प्रथमद्वितीयषष्ठतदितरविषयैर्जिज्ञासा कर्तव्येति ।

The inquiry is justified on the ground that while dharma is not entirely unknown to the student, for he gets a preview of it during the course of his study. It is not known in its entirety and therefore an inquiry must be conducted.

अथ धर्मः प्रसिद्धो वा स्यादप्रसिद्धो वा ?
आद्ये न जिज्ञास्यः, द्वितीये नतराम् ।
तदेतदनर्थकं धर्मजिज्ञासाप्रकरणमिति ।
–अत्रोच्यते–विधिवदधीतसाङ्गस्वाध्यायस्यापाततो ऽर्थज्ञानसम्भवऽपि निर्णयस्य विचाराधीनत्वात् आपातप्रसिध्या धर्मस्य विषयत्वसंभवात् नानर्थकमिति ।
प्रथमं तावत्को धर्मः, कि लक्षणक इति धर्मस्वरूपप्रमाणप्रतिपा
दनपरमिदं सूत्रम् 'चोदनालक्षणोऽ र्थो धर्म' इति ।

मीमांसा

The very definition of chodanā (prompting) is its only authority.

CC0. In Public Domain. Digitized by Muthulakshmi Academy

तदिह धर्मं विषयीकृत्य चिन्त्यते–किमस्य न किश्चत्प्रमाणमस्ति? किं वा प्रत्य क्षादिकमेव प्रमाणम् ? उत चोदनैव ? अथ वा. विकल्पः ? अथ वा समुच्चयः इति ।

तत्र शब्दस्य प्रमाणन्तरप्राप्तप्रायकत्वेन स्वयंमप्रमाणत्वात् प्रत्यक्षादीनांचासाम र्थ्यादप्रमाणको धर्म इत्येकः पक्षः ।

प्रत्यक्षादिगम्य एवेत्येकः पक्षः ।

योगिनां प्रत्यक्षगम्यः, अर्वाचीनानां तु चोदनागम्य इत्यपरः ।

जगद्वैचित्र्यार्थापत्या किमप्यदृष्टमस्तीति सामान्येन प्रसिद्धो धर्म–श्चोदनया ऽग्निहोत्रादिविशेषरूपेण गम्यते, तस्मात्स मुच्चय इति पक्षान्तरम् ।

The definition is now explained :

चोदनैव प्रमाणं सा च प्रमाणमेवेति ना ऽ प्रमाणकत्वमितिसिद्धान्तः ।

तदिह चोदनैव प्रमणमेवेत्यवधारणद्वयं प्रतिज्ञायते ।

तथा च यो धर्मः स चोदनालक्षणः, चोदनैव तस्य लक्षणं प्रमाणम्, चोदना च तस्य लक्षणमेवेति श्रुत्या प्रमाणविधौ अर्थाच्चोद नागम्य एवाऽग्निहोत्रादिर्धर्मो नातल्लक्षण श्चैत्यवन्दनादिरिति स्वरूपमपि सिध्यति ।

तथा ययश्चोदनालक्षणः स धर्म इति स्वरूपविधौ अर्थात्प्रमाणसिद्धिर्वेदितव्या ।

कश्चिदेवं प्रलपति –

The reference is to Prabhākara's views.

कार्यरूपो वेदार्थो न सिद्धस्वरूप इत्यनेन सूत्रेणोच्यते ।

चोदनालक्षणशब्देन कार्यमुच्यते धर्मशब्देन वेदार्थ इति ।

अथ मन्दबुध्यनुग्रहार्थं सूत्रपदानि स्फुटं व्याख्यास्यामः ।

'चोदनालक्षणोऽर्थो धर्म' इति लक्षणसूत्रम् ।

तत्र चोदना नाम विधिघटितं वाक्यम्, 'चोदनेति क्रियायाः प्रवर्तकं वचनमाहुरि'ति शाबरात्, 'चोदना चोपदेश श्च विधिश्चैकार्थवाचिन' इति भाट्टाश्च (SV,5,11) ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

लक्ष्यते प्रमीयतेऽनेनेति लक्षणं प्रमाणम् । अर्थ्यत इत्यर्थः प्रयोजनवानिति यावत् । चोदनैव लक्षणं प्रमणं यस्मिन् तादृशोऽर्थो धर्मः ।

धारणात् स्वानुष्ठातुरभीष्टसंयोजनेन प्रतिष्ठापनाद्धर्मः । अभीष्टं नाम सुखं दुःखनिवृत्तिर्वा ।

तदर्थमेव सर्वेषां प्राणिनां प्रवृत्तिदर्शनात् । तच्चात्र स्वर्गपदवाच्यम् –(यत्सुखम्, न दुःखमिश्रं न भवति, न च ग्रस्तम्– शत्रुकृतापहारादिशङ्कारहितम्, अनन्तरम्– अविच्छिन्नं सन्ततंवर्षादियावत्कालभोग्यम्, अभिलाषोप नीतम्–प्रयत्नानपेक्षाभि लाषमात्रोप नीतविषयम् ।

तत्सुखं स्वःपदास्पदम्–स्वर्गपदवाच्यं भवतीत्यर्थः ।

अत्र विशेषणचतुष्टयेनसांसारिकसुखवैल क्षण्यं प्रदर्शितमिति बोध्यम् ।



The nature of svarga is happiness which is not in any way mixed with misery in the present, nor is it seized by unhappiness later; and it is obtained only by ones wish and not by effort. This is the kind of happiness that is desired by all living beings.

न च लक्षणं नामलक्ष्यपरिच्छेदकस्तद्गता साधारणो धर्मः कश्चिल्लोकप्रसिद्ध आकारः ।

तेन लक्ष्ये वस्तुनि सम्भावनाज्ञाने जाते तन्निर्णेतुमुद्युक्तः प्रमाणेन तदवगच्छतीति सुप्रसिद्धम् ।

तद्यथा–कश्चिद्गां जिज्ञासुः सास्नादिमती गौरित्याप्ताद्गुपश्रुत्य चतुष्पाज्जीवेषुतल्ल क्षणलक्षितां व्यक्तिमन्विष्येऽयं गौरिति चक्षुषाऽवगच्छति ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

न हि कश्चिद्धर्मे आकारोऽस्ति, अलौकिकत्वाद्रूपादिही–नत्वाच्चेति कथं जिज्ञास्य इति वाच्यम् ।

मा भूच्चक्षुरादिगम्य आकारः, चोदनागम्यः स्वर्गफल साधनत्वदिल क्षणस्तु वेदप्रसिद्धोऽस्त्येवेति उक्तदोषानवसरात् ।

अर्थो धर्म इत्युक्ते ब्रह्मणि चैत्यवन्दनादौ घटादौ चातिव्याप्तिः, तद्यवच्छेदायचोदनागम्य इत्युक्तम् ।

तावत्येवोक्ते चोदनागम्येपि फलताऽनर्थरूप श्येनाद्याभिचारक– र्मणि अतिव्याप्तिः, तत्पारिहारार्थं अर्थ इत्युक्तम् ।

तथा चाऽर्थत्वे सति चोदनागम्यत्वमिति लक्षणं भवतीति यथाश्रुतग्राहिणः ।

अन्ये तु चोदनाशब्देन प्रवर्तकं निवर्तकं च वाक्यमुच्यते ।

ततश्च निषेधवाक्यैः 'न हिंस्यात्सर्वा भूतानी' त्यादिभिरनर्थत्वेन लक्ष्यमाणानां हिंसादीनामपि धर्मत्वं स्यात् । तद् व्यावृत्त्यर्थमर्थकम् ।

भाष्ये श्येनादिग्रहणां तु तत्साध्यहिंसापरमिति ।

युक्तं चैतत् – श्येनस्य विहितत्वेन तत्र धर्मस्यैवोचितत्वात् ।

न च 'न हिंस्यादि'ति श्येने प्रवर्तते, तस्य हिंसाविषयत्वात् ।

श्येनस्य चाऽहिंसात्वात् ।

अत एव 'यो हिंसितुमिच्छेत्तस्यायमभ्युपाय' इति भाष्यं (SB) श्येनफलस्यैव हिंसात्वपरं सङ्गच्छते ।

न च तस्य धर्मत्वे शिष्टानां तत्रप्रवृत्त्यापत्तिः, तेषां तत्फलेच्छाभावात् ।

श्येनानुष्ठायिषु अधार्मिकत्वव्यवहारस्य फलमादायैवोपपत्तेश्च ।

अत्रेदं बोध्यम् श्रेयस्साधनत्वेन वेदबोधितत्वं धर्मत्वम् ।

अनिष्टसाधनत्वेन वेदबोधितत्वमधर्मत्वम् ।

अस्ति चेदं यागादौ हिंसादौ च ।

प्रवर्तनाविषयभावनाविषये इष्टसाधनत्वस्य, निवर्त नाविषय भावविषयेऽनिष्टसाधनत्वस्य सत्वात् प्रवर्तनानिवर्तनान्यथानुपपत्त्या तत्कल्पनात् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy



अत एव च नाऽपूर्वे धर्माधर्मशब्दवाच्यत्व मस्माकं मते, तस्य शक्तिरूपत्वेनेष्टानि ष्टसाधनत्वा भावात् ।

यस्य हि शक्तिस्तत्साधनम्, न तु सैवं तत् ।

अत एव यो यागमनुतिष्ठति तं धार्मिक माचक्षते ।

अदृष्टे तच्छब्दप्रयोगस्तु शक्तिशक्तिमतोर–भेदाल्लक्षणया बोध्यः ।

न च विनिगमनाविरहः, 'धर्मं चरे' त्यदिवैदिकप्रयोगस्यैव विनिगमकत्वात् । पूर्वसूत्रे धर्मविचारस्याऽपि प्रतिज्ञातत्वेनतल्लक्षणावश्यकत्वादकारप्रश्लेषेणाऽधर्मलक्षणमपिसूत्रेण क्रियत इति ।

अत्र च यद्यपि 'अग्नीषोमीयं पशुमालभेते' त्यादिविशेषविधिगोच–रत्वात्क्रत्वङ्गहिंसाया 'न हिंस्यात्सर्वा भूतानी' ति सामान्यनिषेधस्य तदितरपरत्वमिति सर्वाचार्यसम्मतम्, तथाप्यस्ति कश्चन विशेषः ।

तथा हि – 'चोदनालक्षणोऽर्थो धर्म' इत्यत्रार्थपदव्यावृत्त्यर्थत्वेना धर्मत्वं श्येनादेः प्राभाकरमते ।

भाट्टमते तु श्येनफलस्यैवा भिचारस्यानर्थहेतुत्त्वाद धर्मत्वम्, श्येनस्य तु विहितस्य समीहितसाधनत्वादधर्मत्वमेव । अर्थपदव्यावर्त्यत्वं तु कलञ्जभक्षणादेर्निषिद्धस्यैवेति ।

तार्किकाणां तु मते कृतिसाध्यत्वम र्थहेतुत्वमनर्थाहेतुत्वं चेति त्रयं विध्यर्थः । तत्र क्रत्वर्थहिंसायां साक्षान्निषेधाभावात्प्राया–श्चित्तानुपदेशा च्चाकृतिसाध्यत्वार्थहेतुत्वमनर्थाहेतुत्वं चेति त्रयं विध्यर्थः ।

तत्र क्रत्वर्थहिंसायां साक्षान्निषेधाभावात्प्रायश्चित्तानुपदेशाच्च कृतिसाध्यत्वार्थहेतुत्ववदनर्थाहेतुत्वमपि विधिना बोध्यत इति न तस्या अनर्थहेतुत्वम्, श्येनादेस्त्वभिचारस्य साक्षादेवनिषेधात्प्रायश्चित्तोपदेशाच्चाऽ नर्थहेतुत्वमिति ।

औपनिषदैस्तु भाट्टमेव दर्शनंव्यवहारेप्रयोणाऽवलम्बि तमिति दिक् ।

तत्सिद्धं चोदनालक्षणोऽर्थो धर्म इति ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

# मन्त्रब्राग

The Vedic corpus with reference to dharma is five-flold: injunctions (vidhi), prohibitions (nishedha), explanations (arthavāda), chants (mantra) and names (nāmadheya):

वेदः पञ्चविधो ज्ञेयो विधिमुख्योऽनपेक्षकः । फलवान् बोधको नित्यो ऽपूर्वार्थस्यैव निर्मलः ॥

वेदयति प्रकाशायति सर्वक्रियाकारकफलात्मकमिति वेदः मन्त्रब्रा ह्मणात्मको नारायणाख्यस्य परमात्मन आद्याशक्तिः। अत एव स्वतन्त्रो निर्दोषत्वादिगुण सम्पन्नश्च ।

स च पुनर्विधिनिषेधार्थवादमन्त्रनामधेयात्मकः पञ्चप्रकारः ॥

## Injunctions

तत्र विधिरनधिगतप्रयोजनवदर्थविधाने नार्थवान् । यथा–अग्नि–होत्रं जुहुयात्स्वर्ग काम' इति अप्राप्तप्रयोजनवद्धोमं विधत्ते– अग्निहोत्रहोमेन स्वर्गं भावयेदिति ।

यत्र तु कर्म प्रकारान्तरेण प्राप्तं तदुद्देशेन गुणमात्रं विधत्ते ।

यथा–'दध्ना जुहुयादि'त्यत्र होमस्य 'अग्निहोत्रं जुहुयादि' त्यनेन प्राप्तत्वाद्धेमोद्देशेन दधिमात्रविधानम्–दध्ना होमं भावयेदिति ।

यत्रतूभयमप्राप्तं तत्र विशिष्टं विधत्ते, तदुक्तम्– 'न चेदन्येन शिष्टा' इति ।

शिष्टा उपदिष्टा इत्यर्थः ।

यथा–'सोमेन यजेते' त्यत्र सोमयागयोरप्राप्तत्वात्सोम विशिष्ट यागविधानम् – सोमवता यागेनेष्टं भावयेदिति ।

विधिरेव मुख्यः प्रधानं यस्य स विधिमुख्यः। तत्सिद्धम्–अप्राप्तंप्रयोजनवन्तमर्थविधिरिति ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

(2) Prohibitions :

अनर्थहेतुकर्मणस्सकाशात्पुरुषस्यनिवृत्तिकरत्वेन निषेधानामपि पुरूषार्थानुवन्धित्वम् ।

तथा हि यथा विधयः प्रवर्तनामभिदधतः स्वप्रवर्तकत्वनिर्वाहार्थं विधेयस्य यागादे : श्रेयस्साधनत्वमाक्षिपन्तः पुरुषं तत्र प्रवर्तयन्ति, एवं 'न कलञ्जं भक्षयेत्' 'ब्राह्मणो न हन्तव्यः' 'न सुरां पिबेत्' इत्यादयो निषेधा अपि निवर्तनामभिदधतः स्वनिवर्तकत्वनिर्वा हार्थं निषिद्धस्य कलञ्जभक्षणादेरनर्थहेतुत्वमाक्षिपन्तः पुरूषं ततो निवर्तयन्तीति स्थितम् ।

(3) Explanations

तथा विध्यादीनामध्ययनविध्युपात्तानां नाऽनर्थक्यम्, एवमर्थवादानामपि तदुपात्तत्वेनार्थक्यानुपपत्तेः, स्वार्थप्रतिपादने च प्रयोजनाभावात्,लक्षणया प्रयोजनवदर्थपर्यवसानं वक्तव्यम् ।

ते चार्थवादा द्विविधा विधिशेषा निषेधशेषाश्च।

तत्र 'वायव्यं श्वेतमालभेते' त्यादि विधिशेषाणां (TS 2,1,1)

'वायुर्वै क्षेपिष्ठा । देवते' त्यादीनामर्थवादानां विधेयार्थस्तावकतयाऽ ऽर्थवत्त्वम् 'बर्हिषि रजतं न देय' मित्यादिनिषेधशेषाणां (TS 1, 5, 1) 'सो रोदी' दित्यादीनामर्थवादानां तु निषेध्यनिन्दकतयेति अतश्च लक्षणया प्राशस्त्यमर्थवादैर्बोध्यते ।

तच्च प्राशास्त्यज्ञानंशब्दभावनायामितिकर्तव्यतात्त्वेन सम्बध्यते ॥

## वेदप्रामाण्य

4. Chants for ritual Purposes

एवं मन्त्राणामपिप्रयोगसमवेतार्थस्मारकतयाऽर्थवत्वम्,न तु तदुच्चारणमदृष्टार्थम्, दृष्टे सम्भवत्यदृष्टस्यान्याय्यत्वात् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

न च दृष्टस्य प्रकारान्तरेणाऽपि सम्भवात् मन्त्राम्नायमनर्थकम्, मन्त्रैरेव स्मर्तव्य मिति नियमविध्याश्रयणात् । अतो युक्तं 'इषे त्वोर्जे त्वा' 'उरू प्रथस्वे' त्यादि मन्त्राणां प्रयोगसमवेताऽर्थस्मारकतया ऽऽर्थवत्त्वम् ।

तत्र ये मन्त्रा यत्र पठितास्तेषां तत्र यद्यर्थप्र कशनं प्रयोजनं सम्भवति तदा तत्रैव विनियोगः । येषां तु न सम्भवति तेषां यत्र सम्भवति तत्रोत्कर्षः ।

यथा पूषानुमन्त्रणमन्त्राणामित्युक्तम् ।

येषां क्वापि न सम्भवति तदुच्चारणस्य त्वगत्या ऽदृष्टार्थत्वम्, सर्वथापि तु तेषां नाऽनर्थक्यमिति ॥

5. Names

नामधेयानां विधेयार्थपरिच्छेदकतया ऽर्थवत्त्वम् ।

तथा हि – 'उद्भिदा यजेत पशुकाम' इत्यत्र हि उद्भिच्छब्दो यागनामधेयम् । तेन च विधेयार्थपरिच्छेदः क्रियते ।

अनेन हि वाक्येनाऽप्राप्तत्वात्फलोद्देशेन यागो विधीयते ।

यागसामान्यस्य चाऽविधेयत्वाद्यागविशेषो विधीयते ।

तत्र को ऽसौ विशेषः इत्यपेक्षायाम् उद्भिच्छब्दादुद्भिद्रूपो याग इति ज्ञायते, उद्भिदा यागेनेति सामानाधिकरण्येन नामधेयान्वयात् ।

तस्य च यजिना सामानाधिकरण्यं न नीलोत्पलादिशब्दवत् ।

तत्र हि उत्पलशब्दस्यार्थादुत्पलादन्यो नीलशब्दस्यवाच्याऽऽर्थो ऽस्ति नीलगुणः ।

लक्षणया तु नीलशब्दस्य द्रव्यपरत्वेन सामानाधिकरण्यम् ।

उद्भिच्छब्दस्य तु यज्यवगतयागविशेषाद्न्यो वाच्याऽ र्थोऽस्ति, विशेषवाचित्वात्तस्य ।

अतश्चावार्थान्तरवाचित्वाभावेन न नामधेयस्य नीलशब्दवत्सामानाधिकरण्यम् ।

किं तर्हि 'वैश्वदेव्याऽमिक्षे' त्यत्रामिक्षा शब्दवत् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

वैश्वदेवीशब्दस्य हि देवतातद्धितान्त त्वात्तद्धितस्य च 'सास्य देवते' ति सर्वनागार्थे स्मरणात्सर्वनाम्नां चोपस्थित विशेषवाचित्वेन विशेषपरत्वम्।

तत्र कोऽसौ वैश्वदेवीशब्दोपात्तो विशेषः? इत्यपेक्षायां आमिक्षापदसान्निध्यादामि क्षारूपो विशेष इत्यवगम्यते। तथाहुः (T V, 2,2,9)-

'आमिक्षां देवतायुक्तां वदत्येवैष तद्धितः। आमिक्षापदसान्निध्यात्तस्यैव विषयार्पण' मिति।

तथा – (T V 2,2,9)

'श्रुत्यैवोपपदस्याऽर्थस्सर्वनाम्ना प्रतीयते। तदर्थस्तद्धितेनैवं त्रयाणामेकवाच्यते' ति॥

तस्माद्यथा वैश्वदेवीशब्दोपात्त विशेषसमर्पक त्वेनाऽमिक्षापदस्य वैश्वदेवा'शब्देन सामानाधिकरण्यम्, एवं सामान्यस्या ऽविधेयत्वात् यज्यवगतयाग विशेषसमर्प कत्वेन नामधेयस्य यजिना सामानधिक रण्यम्।

तत्सिद्धं नामधेयानांविधेयार्थपरि च्छेदक तयाऽर्थवत्वम्।

यथाहुः (TV,1,4,1)-

'तदधीनत्वाद्यागविशेषसिद्धे' रिति।

नामधेयत्वंच निमित्तचतुष्टयात्—मत्वर्थल क्षणा भयात्, वाक्यभेदभयात्, तत्प्रख्य शास्त्रात्, तद्व्यपदेशाच्चेति।

तत्र 'उद्भिदा यजेत पशुकाम' इत्यत्रोद्भिच्छ ब्दस्य यागनामधेयत्वं मत्वर्थलक्षणाभयात्। एवं ज्योतिष्टोमादिशब्दानामपि।

'चित्रया यजेत पशुकाम' इत्यत्र (TB, 19,7,2) (TS 2,4,6) चित्राशब्दानामपि।

'अग्निहोत्रं जुहोती' त्यत्राग्निहोत्रशब्दस्य (Ibid.1,5,9) कर्मनामधेयत्वं तत्प्रख्य शास्त्रात्।

तस्य गुणस्य प्रख्यापकशास्त्रस्यविद्यमान त्वेना ग्निहोत्रशब्दः कर्मनामधेय इति यावत्।

एवमाघारादिशब्दानामपि। 'श्येनेना भिचरन् यजेत' (ASS, 22, 4,13) 'गवाऽभिचर्यमाणो यजेते' त्यत्रश्येनगो शब्दयोः कर्मनामधेयत्वं तद्व्यपदेशात्।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

तेन व्यपदेशः उपमानं तदन्यथानुपपत्त्येति यावत् ।

एवं 'सन्दंशेनाभिचरन् यजेते' त्यत्र सन्दंशशब्दस्यापि ।

तत्सिद्धं निमित्तचतुष्टयान्नामधेयत्वम् ।

उत्पत्तिशिष्टगुणबलीयस्त्वमपि पञ्चमं नामधेयत्वे निमित्तं केचिदाहुः 'वैश्वदेवेन यजेते' त्यत्र वैश्वदेवशब्दस्य कर्मनामधेयत्वंउत्पत्तिशिष्ट गुणबलीयस्त्वात् (MS, 1,10,8) ।

उक्तमत्वर्थलक्षणादिप्रकारचतुष्टयासम्भवात् ।

तदेवं संक्षेपेण निरूपितं मत्वर्थलक्षणादिप्रकारचतुष्टयनिरूपणेन नामधेयानां विधेयार्थपरिच्छेद कतयाऽर्थवत्त्वम् ।

प्रयोजनं तु तेषां सर्वत्र व्यवहार एव ।

न ह्यन्तरेण नामधेयं ऋत्विग्वरणादिषु 'अनेनाहं यक्षय' इत्याख्यानेपायो लघुः कश्चिदस्तीति दिक् ।

## द्वादशमञ्जरी

**How are Vedas authoritative in the matter of dharma ?**

एवं पञ्चविधो वेदः प्रामाण्येनैव संस्थितः ।
चोदनासचिवस्साङ्गस्तेन धर्मोजयत्यलम् ॥

पुराणन्यायमीमांसा । धर्मशास्त्राङ्गमिश्रिताः।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥ (YS,1,3)

श्रुतिस्स्मृतिस्सदाचारः स्वस्य चप्रियमात्मनः ।
सम्यक् सङ्कल्पजः कामो धर्ममूलमिति स्थितम् ॥

वेदमेव सदाऽभ्यस्येत्तपस्तप्यन्द्विजोत्तमः ॥ (ibid,1,7)
वेदाभ्यासो हि विप्रस्य तपः परमिहोच्यते ॥
योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥
(MUS, 2,168)

CC0. In Public Domain. Digitized by Muthulakshmi Academy.

यज्ञानां तपसां चैव शुभाना चैव कर्मणाम् ।
वेद एव द्विजातीनां निःश्रेयसकरः परः ॥
(YS, 1,40)

वेदस्वीकरणं पूर्वं विचारो ऽभ्यसनं जपः ।
तद्दानं चैव शिष्येभ्यो वेदाभ्यासो हि पञ्चधा ॥

आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना ।
यस्तर्केणानुसन्धते स धर्मं वेद नेतरः ॥
(TA, 1,1,3)

"तस्मात्स्वाध्यायोऽध्येतव्यः" "ब्राह्मणेन निष्कारणो धर्मःष्षडङ्गो । वेदोऽध्येयो ज्ञेयश्च" "न हिंस्यात्सर्वा भूतानि" "अग्नीषोमीयं पशुमालभेत," "श्येनाजिराभ्यामभिचरन् यजेत" "श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥"

स्वे स्वेऽधिकारे या निष्ठा स गुणः कीर्तितः ।
विपर्ययस्तु दोषःस्यादुभयोरेष निर्णयः ॥

इत्येवमादिवाक्यैश्चच प्रमाणैर्धर्मतत्परैः ।
उत्थापितमिदं शास्त्रं सन्दिग्धस्वर्थविनिर्णये ॥

वेद एव प्रमाणं स्याद्धर्मे यथा तथा ।
तद्विचार इदं शास्त्रं निश्चितं वेदवित्तमैः ॥

शास्त्रं धर्मविचाराख्यंद्वादशाध्यायलक्षितम् ।
पञ्चावयवसंयुक्तसहस्राधिकृतं विदुः ॥

विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम् ।
सङ्गतिश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं मतम्॥

तस्य संग्राहक श्लोकान् पूर्वाचार्यविनिर्मितान् । विविच्य सुखबोधार्थंलिखाम्यनतिविस्तरान् ॥

धर्मो द्वादशलक्षण्यां व्युत्पाद्यस्तत्र लक्षणैः ।
प्रमाणभेदशेषत्वप्रयुक्तिक्रमसंज्ञकाः ॥

अधिकारोऽतिदेशश्च सामान्येन विशेषतः ।
ऊहो बाधश्च सामान्येन विशेषतः ।
ऊहो बाधश्च तन्त्रं च प्रसङ्गश्चोदिताः क्रमात् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy



The author now takes up a content analysis of the Pūrva-mīmāmsā sūtras which are in twelve sections (hence called dvādaśa-lakshaṇī)

लक्षणान्यध्यायाः, द्वादशानां लक्षणानां समाहारः द्वादशलक्षणी तादृशस्य द्वादशाध्यायेपेतस्य शास्त्रस्य धर्मो विषयः। प्रमाणादयः प्रसङ्गान्ता द्वादश पदार्थाः क्रमाद्द्वादशानामध्यायानां विषयः।

(1). Consideration of what the adhyāyas deal with :

प्रथमेऽध्याये विध्यर्थवादादिरूपं धर्मस्य प्रमाणं निरूपितम् ।

द्वितीयेऽध्याये यागदानादिकर्मभेदः ।

तथा च समस्तेनाऽध्यायेन धर्मे प्रमाणनिरूपणात् 'कथं लक्षणो धर्म' इत्ययमंशो विचारितः ।

तद्विचारादेव तत्प्रमेयस्यज्योतिष्टोमाष्टकादेर्धर्मत्वावधारणात्

'को धर्म' इत्ययमंशोऽपि विचारितो भवति ।

वेदादिप्रमेयो धर्म इत्यवगतेऽपि न कृत्स्नधर्मस्वरूपमेव भवति, किन्तु लक्षणेन इयन्ति धर्मस्वरूपाणीत्यव धारणात् ।

अतो भेदलक्षणमपि 'को धर्म' इत्यस्मिन्नंशेऽन्तर्गतम् ।

'कान्यस्य साधनानी' ति 'यातः शेषलक्षणमि' त्यदिना तान्यपि ज्ञातुं शक्यन्ते ।

कर्तुरधिकारिण फलं तु षष्टेन, सर्वं च भेदाभेदशेषशेष्यादि प्रमाणबलेन निरूपणीयमिति प्रमाणलक्षणात्पश्चदारम्भ इति वोध्यम् ।

तृतीये प्रयाजादीनां दर्शपूर्णमासाद्यर्थत्वेन तच्छेषत्वम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

चतुर्थे गोदोहनस्यपुरुषार्थत्वप्रयुक्त्यानुष्ठानं न तु क्रत्वर्थत्व प्रयुक्त्येत्येव मादयः ।

पञ्चमे क्रमनियतिविधेयत्वादयः ।

षष्ठे कर्तुरधिकारो नान्धादेरित्यादयः ।

सप्तमे 'समानमितरच्छ्येनेने' त्यादिप्रत्यक्षवचनेनाग्निहोत्रा–दिनाम्नानुमितवचनेन च सामान्यतोऽतिदेशः।

अष्टमे 'सौर्य चरूं निर्वपेदि' त्यत्र निर्वापस्तद्धितेन देवतानिर्देशः, एकदैवतत्वमौषधद्रव्यकत्वमित्यादिलिङ्गेना ग्नेयपुरो. डाशो ऽतिकर्तव्यता नान्यस्येत्येवमादिविशेषतोऽतिदेशः ।

नवमे प्रकृतौ 'अग्नये जुष्टं निर्वपामी'ति पठिते मन्त्रे
विकृतौ सौर्यं चरावग्निपदपरित्यागेन सूर्यपदप्रक्षेपेण 'सूर्याय जुष्टं निर्वपामी' दयःवमाद्यहः ।

दशमे कृष्णलेषु चोदकप्राप्तस्यावघातस्य वितुषीकरणासम्भवेन लोप इत्येवमादिर्बाधः ।

एकादशे बहूनामाग्नेयादीनां प्रधानानां सकृदनुष्ठितेन प्रयाजा द्यङ्गेनोपकार इत्यादि तन्त्रम् ।

द्वादशे प्रधानस्य पशोरुपकारायानुष्ठितेन प्रयाजाद्यङ्गेन पश्वङ्गपुरोऽप्युपकार इत्यादिप्रसङ्गः ।

(2) The Special issues discussed in the pādas of the text.

पादानामसाधारणं विषयं दर्शयति–
विध्यर्थवादस्मृतयो नाम चेति चतुर्विधम् ।
प्रथमाध्यायगैः पादैः चतुर्भिर्मानमीरितम् ॥

प्रथमे पादे विधिरूपं मानमीरितम् ।

द्वितीयेऽर्थवादरूपम् । अर्थवादो मन्त्रस्याप्युपलक्षकः ।

तृतीये समृतिरूपम् ।

स्मृतिराचारमप्युपलक्षयति ।

चतुर्थे उद्भिच्चित्रादिनामरूपम् ।

विधिश्चोदना, सैव भेदादिसर्वविशेषणविशिष्टे धर्मस्वरूपे प्रमा णमेवेत्यवधारणेन तदितरेषां प्रत्यक्षादीनामप्रामाण्यं सूचितम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy



न चैवमर्थवादादीनामप्रामाण्यं स्यादिति वाच्यम् ।

तुल्यजातीयापेक्षत्वादवधारणस्य ।

यथा शुक्लः पट इत्युक्ते कृष्णादीनामेव निवृत्तिर्न तु द्रव्यादीनाम्, एवं चोदनैक वाक्यतया चोदनैवेत्यवधारणेन प्रत्यक्षादी नामेव व्यावृत्तिर्न त्वर्थवादादीनाम् ।

चोदनैकवाक्यतया चोदनामूलतया च प्रमाणीभवता तेषां चोदनाविषयेणावधारणेन प्रामाण्यं निरस्तम्, नाऽपि साधितम् ।

अत उपरितनपादत्रयं तत्साधनपरमिति बोध्यम् ।

तथा चाऽहुः (SV -)

इति प्रमाणत्वमिदं च सिद्धमुक्त्वेह धर्मं प्रति चोदनायाः ।

अतः परं च प्रविभज्य वेदं त्रेधा ततो वक्ष्यवेतिं तस्य योऽर्थः ॥

इति ॥

**अथ द्वितीयाध्यायपादार्थसङ्ग्रहारम्भः**

उपोद्घातः कर्मभेदमानं तस्याऽपवादगीः।
प्रयोगभेद इत्येते द्वितीयाध्यायपादगाः ॥

द्वितीयाध्यायस्य प्रथमे पादे आख्यातमेवा पूर्वबोधकम्, अपूर्वसद्भावश्चेत्यादिकः कर्मभेदचिन्तोपयुक्तोपोद्धतो वर्णितः ।

द्वितीये धातुभेदपुनरुक्त्यादिभिः कर्मभेदः ।

तृतीये रथन्तादीना कर्मभेदप्रामाण्या पवादः ।

चतुर्थे नित्यकाम्ययोः प्रयोगभेदः।

**अथ तृतीयाध्यायपादार्थसङ्ग्रहारम्भः**

श्रुतिर्लिङ्गं च वाक्यादिविरोधप्रतिपत्तयः ।
अनारभ्योक्तिबह्वर्थस्वाम्यर्था अष्टपादगाः ।

तृतीयाध्यायस्य प्रथमे पादे शेषत्वबोधकाना श्रुतिलिङ्गादीनां मध्ये श्रुतिर्विचारिता ।

द्वितीये लिङ्गम् ।

तृतीये वाक्यप्रकरणादि ।

चतुर्थे निवीतोपवीतादिष्वर्थवा दत्वविधि त्वादिनिर्णयहेतुः श्रुत्यादेः परस्परविरो धसदसद्भावः ।

पञ्चमे प्रतिपत्तिकर्माणि ।

अवशिष्टस्य केऽप्युपयोगो वाचनिकः प्रतिपत्तिः ।

यथा पुरोडाशभक्षणादि ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

षष्ठेनारभ्याधीतानि ।

सप्तमे बहुप्रधानोपकारकप्रयाजादीनि ।

अष्टमे याजमानानि ।

**अथ चतुर्थाध्यायपादार्थसङ्ग्रहः**

प्रधानस्य प्रयोक्तृत्वमप्रधानप्रयोक्तृता ॥
फलचिन्ता जघन्याङ्गचिन्तेत्येते चतुर्थगाः ॥

चतुर्थाध्यायस्य प्रथमे पादे प्रधानभूताऽऽमिक्षा दध्यानयनस्य प्रयोजिकेत्यादिप्रधानप्रयोक्तृत्वं विचारितम् ।

द्वितीये त्वप्रधानं वत्सापाकरणं शाखाच्छेदने प्रयोजकमित्याद्यप्रधानप्रयोक्तृत्वं विचारितम् ।

तृतीये जुहूपर्णमयीत्यादेरपापश्लोकश्रवणादिफलभावाभावचिन्ता।

चतुर्थे राजसूयगतजघन्याङ्गामिक्षद्यूतादिचिन्ता ॥

**अथ पञ्चमाध्यायपादार्थसङ्ग्रहः**

श्रुत्यादिः क्रमस्तस्य विशेषो वृध्यवर्धने ।
श्रुत्यादेर्बलिता चेति पञ्चमाध्यायपादगाः ॥

पञ्चमाध्यायस्य प्रथमे पादेश्रुत्यर्थपाठादिभिः क्रमो निरूपितः ।

स च विधिनिरूपणे स्फुटीभविष्यति ।

द्वितीये वाजपेयगतेषु सप्तदशासु पशुष्वेकैकधर्मः समापनमित्या दिक्रमविशेषः ।

तृतीये पञ्चप्रयाजादीनामावर्तनेनै कादशयमित्यादिवृद्धिः, अदाभ्यग्रहचित्रिण्योरनावृत्तिरित्यादिवृध्यभावः ।

चतुर्थे क्रमनियामकानां श्रुत्यर्थपाठादीनां प्रबलदुर्बलभावः ॥

**अथ षष्ठाध्यायपादार्थसङ्ग्रहः**

अधिकारी तस्य धर्माः प्रतिनिध्यर्थलोपने
दीक्षास्वं देयवह्नी षष्ठे पादेष्वमी स्थिताः ॥

षष्ठाध्यायस्य प्रथमे पादे कर्माधिकारः कर्तुरस्ति, अन्धादेर्नास्ति स्त्रिया अस्ति, योऽस्ति स च पत्या सहेत्येवमादिनाऽधिकारी निरूपितः ।

द्वितीये सत्रदिकारिणा प्रत्येकं कृत्स्नं फलम्, दर्शपूर्णमासयोः कर्त्रैक्यनियमः, काम्यकर्मसमापनीयमित्येवमादयोऽधिकारिधर्मा उक्ताः ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy



तृतीये द्रव्यस्य प्रतिनिधिरस्ति देवादीना मग्न्यादीनामधिकारिणश्श्वसनास्ती' त्यादिनिरूपणम् ।

चतुर्थे पदार्थलोपनं विचारितम्, अक्तनाशे सति आज्येन यजेत, इडार्थस्य नाशे सति शेषं न ग्राह्यमित्यादिकम् ।

कालापराधेन चन्द्रोदये सत्यभ्युदयेष्टिः प्रायश्चित्तम्, ज्योतिष्टो मस्यौ.कादयो दीक्षाः, द्वादशाहस्य द्वादश दीक्षा इत्यादि निरूपितम्।

षष्ठे सत्राधिकारिणस्तुल्यकक्ष्या एव, सत्रं विप्रस्यैवेत्येवमादिकं चिन्तितम् ।

सप्तमे पित्रादिकं न देयम्, महाभूमिर्न देयेत्येवमादिर्देयविचारः।

अष्टमे लौकिकाग्नौ उपनयनहोमः स्थपता ऽष्टिस्तथैवेत्येवमाद्यग्नि विचारः कृतः ।

**अथ सप्तमाध्यायपादार्थसङ्ग्रहः**

प्रत्यक्षोक्त्याऽतिदेशोस्य शेषस्सामनि रूपणात् ।
नामलिङ्गातिदेशौ द्वौ सप्तमाध्यायपादगाः ॥

सप्तमाध्यायस्य प्रथमे पादे 'समानमि तरच्छयेनेने' त्यादिप्रत्य क्षवचनानिर्देशः।

द्वितीये रथन्यरशाब्देन गानमात्राभि धायिना गानस्यैवा—तिदेश्यत्वमित्येतादृशः पूर्वोक्तनिर्देशस्य शेषो विचारितः । तृतीयेऽ ग्निहोत्रनाम्नातिदेशः ।

चतुर्थे निर्वापौषधद्रव्यादिलिङ्गातिदेशः ।

**अथाष्टमाध्यायपादार्थसङ्ग्रह :**

स्पष्टलिङ्गादथाऽस्पष्टात्प्रबलादपवादतः ।
अतिदेशविशेषास्स्युरष्टमाध्यायपादगाः ॥

अष्टमस्य प्रथमे पादे स्पष्टेन लिङ्गेनाति देशविशेषः ।

तद्यथा सौर्यचरावतिदेशकानि निर्वापः, तद्धितेन देवतानिर्देशः, एकदेवतात्वमि त्यादीनि स्पष्टान्याग्नेयलिङ्गानि ।

द्वितीये त्वस्पष्टैर्लिङ्गैरतिदेशः ।

तद्यथा वजिने हविस्सामान्येन लिङ्गेन पयोविध्यन्तोऽतिदिश्यते ।

तत्र लिङ्गमस्पष्टम्, शीघ्रं तद्बुध्यनु त्पादनात् ।

तृतीये प्रबलेन लिङ्गेनातिदेशः ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

तद्यथा (KS, 10) आभिचारिकेष्टौ आग्ना वैष्णवसारस्व–तबार्हस्पत्येषु हविष्षु त्रित्वेन लिङ्गेन यथाक्रममाग्ने–

यादिविध्यन्ते प्राप्ते द्विदेवत्यत्वेन लिङ्गेन प्रथममाग्नावैष्णवे तृतीयस्थानीयस्याग नीषोमीयस्य विध्यन्तोऽतिदिष्टः प्रबलश्च द्विदेवत्यत्वम्, शब्दोच्चार णमात्रेण सहसा प्रतिभासात् ।

क्रमस्तु विलम्बितप्रतीत्या दुर्बलः ।

चतुर्थे दर्वीहोमेऽतिदेशोऽपपद्यते ॥

**अथ नवमाध्यायपादार्थसङ्ग्रहः**

ऊहारम्भोऽथ सांमोहो मन्त्रोहस्तत्प्रसङ्गजः।
नवमाध्यायपादेषु चतुर्ष्वेति प्रकीतिताः ॥

नवमाध्यायस्य प्रथमे पादे उपोतपूर्वकमू हविचारारम्भः ।

ऊहो नाम प्राकृतस्य प्रयोगस्यान्यथाभावः।

तत्र प्रयाजादयो धर्मा अपूर्वप्रयुक्ताः, अवघात मन्त्रादिष्वविवाक्षितं व्रीह्यग्न्यादि स्वरूपम्, साधनविशेषत्व मात्रं विवक्षितमित्येव मादिरूपोद्धातः ।

सवित्राशिवपूषशब्दानां विकृतिषु नास्त्यूहः, अग्निशब्द–

स्यास्त्यूह इत्याद्यूहविचारारम्भः ।

द्वितीये सपरिकरस्सामोहः ।

तृतीये मन्त्रोहः ।

चतुर्थे मन्त्रोहप्रसङ्गापतितो विचारः ॥

**अथ दशमाध्यायपादार्थसङ्ग्रहारम्भः**

द्वारलोपोऽस्य विस्तारः कार्यैकत्वं समुच्चयः ।

ग्रहसामप्रकीर्णानि नञर्थाश्चा ऽष्टपादगाः ॥

दशमाध्यायस्य प्रथमे पादे बाधहेतुर्द्वार लोपो निरूपितः ।

तद्यथा 'स्वय कृता वेदिर्भवती' त्यत्रवेदिनि ष्पादनरूपस्य लोपेन निष्पादकानामु द्धननादीनां बाधः ।

कृष्णलेषु वितुषीकरणस्य द्वारस्यलोपेनाव घातस्य बाधः (MS,2,2,2)।

बाधो द्विविधः । प्राप्तबाधः अप्रप्तबाधश्चेति ।

तत्र तार्तीयबाधो द्वितीयः ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy



तत्र हि यावद्दुर्बलेन प्रमाणेन विनियोगः कर्तुमारभ्यते तावदेव प्रबलप्रमाणेन विनियोगः क्रियत इति तद्बोधितेनेतरबाधो प्राप्तबाधः, दुर्बलप्रमाणास्याप्रवृत्तत्वात् ।

प्राकृतस्य त्वङ्गस्य विकृतौ चोदकप्राप्तस्य प्रत्याम्नानादर्थ लोपात्प्रतिषेधाद्वा यो बाधस्स प्राप्तबाधः ।

यथा अवघातस्य द्वारलोपात् ।

यथा वा—पित्र्येष्टौ होतृवरणस्य 'न होतारं वृणीत'(MS 1,10,18) इति प्रतिषेधादिति बोध्यम् ।

द्वितीये सङ्क्षेपेणोक्तस्य द्वारलोपस्य बहुभिरुदाहरणैर्विस्तरः ।

तृतीये बाधकारणं कार्यैकत्वम् ।

तद्यथा— प्रकृतौ गवाश्वादिदक्षिणाया ऋत्विक्परिक्रयः कार्यम् ।

तथा विकृतिरूपे भूनाम्न्येकाहे धेनुरूपाया दक्षिणायास्तदेव कार्यम्, ततो धेन्वा गवाश्वादिदक्षिणा विकृतौ चोदकप्राप्ता बाध्यते ।

चतुर्थे नक्षत्रेष्टिविहिता उपहोमाश्चोदकप्राप्तैः नारिष्ठहोमैस्सह समुच्चीयन्त इत्यादिस्स मुच्चयः ।

पञ्चमे षोडशिग्रहः प्रकृतिगामी, स चाग्रय णपात्रादेव गृहीतव्य इत्यादिबाधप्र सङ्गागतो ग्रहादिविचारः ।

प्रकृतिगामी, स चाग्रयणपात्रादेव गृहीतव्य इत्यदि बाधप्रसङ्गगतो ग्रहादिविचारः ।

षष्ठे 'एकं साम तृचे गेयमि' त्यादिबाध प्रसङ्गागतो ग्रहा दिविचारः ।

षष्ठे 'एकं साम तृचे गेयमि' त्यादिबाध प्रसङ्गागतस्सा—मविचारः ।

सप्तमे पश्वङ्गेषु हविर्भेदः, गृहमेधीयमपूर्व कर्मेत्यादिबाध प्रसङ्गागतः (MS, 1,10,1) प्रकीर्णविचारः ।

अष्टमे 'नानुयाजेष्वि'ति पर्युदासः,'न सोम' इत्यर्थवादः, 'नातिरात्र' इति प्रतिषेधइत्या दिर्बाधोपयुक्तो नञर्थविचारः।

पर्युदासस्स विज्ञेया यत्रोत्तरपदेन नञ् ॥

यद्यजतिषु ये यजामहं करोति तदनुयाज व्यतिरिक्तेष्विति पर्युदासे विधेरेवविशेषित त्वम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

'न तौ पशौ करोती' त्याज्यभागौ निषिध्यप

श्ववत् 'न सोमेऽध्वर' इत्याम्नायते ।

यथा न तौ सोमे करोति तथा ऽर्ती पशौ

कुर्यदिति तदर्थः ॥

**अथैकादशाध्यायपादार्थसङ्ग्रह :**

उपोद्घातस्तथा तन्त्रावापौ तन्त्रस्यवि

स्तृतिः ।

एकादशाध्यायस्य तृतीये तन्त्रमुदाहरत् ।

द्वितीये तन्त्रावापौ सङ्क्षेपेणोक्तौ ।

तृतीये तन्त्रमुदाहरणबाहुल्येन प्रपञ्चितम् ।

चतुर्थे तथैवावापः प्रपञ्चितः ।

**अथ द्वादशाध्यायपादार्थसङ्ग्रहः**

प्रसङ्गतन्त्रिनिर्णीतिः समुच्चयविकल्पने ।

द्वादशाध्यायपादार्था इति पादर्थसङ्ग्रहः ॥

तृतीयपादे समुच्चयस्य प्राधान्येन निर्णयः,

चतुर्थे तु विकल्पस्येति बोध्यम् ।

द्वादशाध्यायस्य प्रथमे पादे पशुधर्माणां

पशुपुरोडाश प्रसङ्गः, सवनीयपशोस्त

न्त्रत्वम्, न तु सवनीयपुरोडशानाम् ।

विकृतिस्तन्त्रिणी प्रकृतिः ।

अन्वारम्भनीया विकृतिष्वपि स्यात्,न तु

प्रकृतिस्तन्त्रिण प्रकृतिः ।

प्रकृतावेमत्यादिविचारः ।

तृतीये त्वग्वाससोस्समुच्चयः, आघार

गतानामृजुत्वसन्ततत्वादीनां समुच्चय

इत्यादिकं प्रधान्येन,यवव्रीह्यो विकल्प

इत्यादिकं समुच्चयापवा दत्वेनेत्युभयं

चिन्तितम् ।

चतुर्थे चैन्द्राबार्हस्पत्ययाज्या नुवाक्यायु

गलयोर्विकल्प इत्यादिकं प्राधान्येन,

याज्यानुवाक्ययोस्समुच्चय इत्यादिकं

विकल्पापवादत्वेनेत्युभयं चिन्तितम् ।

तदेवं द्वादशाध्यायगतेषु षष्टिसङ्ख्याकेषु

पादेषु प्रतिपाद्या अर्थास्सङ्गृहीताः ।

ननु—यथोक्तेभ्यः पादेभ्योऽ र्था बहवस्तत्त

त्पादेषु विचार्यन्ते तेषां कथं तत्तत्पादान्त

र्भाव इत्याशंक्याऽह—उपोद्घातापवादाभ्यां

प्रसङ्गानुप्रसङ्गतः ।

तत्तत्पादगतत्वेन विचारान्तरमुन्नयेत् ॥

यथोक्तपादप्रतिपाद्यादन्येष्वर्थेषु यथोचितं

कश्चिदुपोद्घातः, कश्चिदवादः, कश्चित्प्रस

ङ्गपतितः, कश्चिदनुप्रसङ्गपतित इत्येवं

पादान्तर्भाव उन्नेयः ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

III Concerning the order in terms of priority and subsequence of the topics dealt with in the chapters of the text.

ननु सन्त्वेवमध्यायानां पादानां च व्यवस्थिता अर्थाः, तदीयस्तु क्रमः कथमवगन्तव्य इत्यत आह –

शास्त्रपूर्वोत्तरीभावोऽध्यायानामभिधास्यते। पादानां तु तगत्रैव लेशादुत्पादयामहे ॥

एकस्मिन्नध्याये समाप्ते सति अध्याया न्तरारम्भे तयोरध्याययोः पूर्वोत्तरीभा वोक्ष्येता पादानां पूर्वोत्तरीभावे उदाते सति तद्व्युत्पत्त्या पादान्तरेष्वपि तस्योत्प्रेक्षितुं शक्यतयातमुदाहरति–

विधिःसाक्षान्निमितिर्धर्मे तस्यशेषोऽ– र्थवादगीः ।

वेदगूला स्मृतिर्नाम वाक्यांशोऽमीष्वतः क्रमः ॥

जिज्ञास्यत्वेन प्रतिज्ञाते धर्मे विधिद्वारा प्रागाण्याद्विध्यनंतर भावित्वम् ।

स्मृतिवाक्यस्य सार्थवादविधिरूपवेदमूल तया प्रामाण्यादर्थस्त– दोत्तरभावित्वम् ।

नामधेयस्य वाक्यैकदोशत्वेनपूर्वोक्तत्रिवि धवाक्यविचारा– त्तरकालीनत्वम् ।

तथा द्वितीयादौ (PMS 2,1,1) 'भावार्थाः कर्मशब्दास्तेभ्यः क्रियाप्रतीयेतैप ह्यर्थो विधीयते' 'धर्मः प्रतिपदं न तु, भावार्थस्य फलार्थत्वमिति' अधिकरणद्वयेनाख्यात प्रत्ययान्ताद्धातुप दादपूर्वं गम्यत इति स्थापितम् तस्यपुनरपू र्वद्वा रमस्ति नेति सद्भावं साधयित्वा, 'आख्यातद्वैधमिष्टं नः' इत्योवमाद्याधिकरणौ स्तादपवाद तत्प्रसक्तानुप्र सक्तचिन्तया सर्वः पाटो वक्ष्यमाणकर्म भेदचिन्तोपयुक्ततया उपोद्घातत्वेन वर्णितः।

द्वितीयाध्यायद्वितीयपादे तु शब्दान्तरा भ्याससङ्ख्याना–मधेयगुणैः कर्मभेदः ।

एवमुपजीव्योपजीवकभाव उभयोर्द्रष्टव्यः ।

तृतीयपादे तु ज्योतिष्टोम एव रथन्तरादि सामगुणविधानं न ततः कर्मान्तरस्य ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

एवं राजसूयान्तर्गतावेष्टेर्न कर्मान्तरत्व मित्येवमादिगुण प्रसङ्गागतं निरूप्य पुनः प्रकरणान्तरादिभिः कर्मभेदः प्रतिपादितः। चतुर्थे तु 'यावज्जीवमग्निहोत्रं जुहोती' ति जीवनं निमित्तीकृत्याग्निहोत्रकर्मविधानम्, शाखाभेदेऽपि न कर्मभेद इति चोक्तम् । तथ चोभयोः पादयोश्शेषशेषिभावउपपादितो भवतीति ।

अनेन न्यायेनोत्तराध्यायगतपादानांपर स्परं क्रम उन्नेयः ।



The concordances (sangati) are now dealt with.

इत्थं शास्त्रस्याध्यायानां पादानां च क्रमवि शिषवि–शिष्टानामसाधारणप्रतिपा द्यमर्थं निरूप्य तन्निर्णयफलं दर्शयति–ऊहित्वा सङ्गतीस्तिस्रस्तथाऽवान्तरस ङ्गतिम् । ऊहेदाक्षेपदृष्टान्तप्रत्युदाहरणदिकाम् ॥

1. What sangati is :

शास्त्रादिप्रतिपाद्यार्थसम्बन्धितयाऽऽधिकरणे योजिते सति तस्याऽधिकरणस्यशास्त्रस ङ्गतिरध्यायसङ्गतिः पादसङ्गतिश्चेति तिस्र ऊहिता भवन्ति ।

तद्यथा – प्रथमाध्यायप्रथमपादस्यद्विती याधिकरणे धर्मस्य लक्षणप्रमाणराहित्यं पूर्वपक्षीकृत्य तत्सद्भाव : प्रतिपदितः । तस्याऽधिकरणस्य धर्मसम्बन्धितया धर्मविचारशास्त्रसङ्गतिः। प्रमाणविचाररूपत्वात्प्रथमाधयायसङ्गतिः ॥

2. The Sangati of topics considered (adhikaraṇa)

यथैतत्सङ्गतित्रयमूहितम्, तथापूर्वोत्तरादि करणयोः परस्परमवान्तरसङ्गतिरूहनीया। सा चानेकरूपा अक्षेपसङ्गतिः, दृष्टान्तस ङ्गतिः, प्रत्युदाहरणसङ्गतिः, उपोध्दातस ङ्गतिश्चेति ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

एवमादि रूपाणामाक्षेपादिसङ्गतीनामूहं व्युत्पादयति–पूर्वन्यायस्य सिद्धान्तयुक्तिं वीक्ष्य परे नये पूर्वपक्षोक्तयुक्तिं च, तत्राक्षेपादि योजयेत् ।

तदेतत्सर्वं योजयित्वा प्रदर्श्यते–

3. The Sangati of objections raised (ākshepa)

प्रथमेऽध्याये प्रथमपादस्य प्रथमाधिकरण गतो धर्मविचारशास्त्रं वैधमिति सिद्धन्तः। अर्थज्ञानहेतावध्ययने नियमविधेस्सम्भवादिति तद्युक्ति : ।

द्वितीयाधिकरणे धर्मे लक्षणं प्रमाणं च नास्तीति पूर्वपक्ष :, लौकिकाकारहीनत्वात्प्रत्यक्षाद्यप्रवृत्तेश्चेति तद्युक्ति : ।

तया युक्तया धर्मस्य लक्षणप्रमाणरहितत्वे सति नरविषाणसमो धर्म इतितद्विचारशास्त्रस्य विधेयत्वम–नुपपन्नमित्याक्षेपसङ्गति : ।

4. The Sangati of illustrations (dṛshṭānta)

यथा प्रथमाधिकरणे नियमविधिसम्भवेन हेतुना विचारशा– स्त्रस्य विधेयत्वमुक्तम्, तथा द्वितीयाधिकरणे लौकिकाकारहीनत्वप्रत्य क्षाद्यप्रवृत्तिरूपेण हेतुना धर्मप्रमाणे न स्त इति दृष्टान्तसङ्गति : ।

5. The Sangati of counter - illustrations (pratyudāharāṇa)

यथा प्रथमाधिकरणसिद्धान्तेपूर्वोक्तयुक्तिरवलोक्यते, तथा द्वितीयाधिक रणसिद्धान्ते काञ्चिदपि युक्तिं न पश्याम इति प्रत्युदाहरणसङ्गतिः।

एते प्रत्युदाहरणदृष्टान्तसङ्गती मन्दबुद्धिभिरपि सर्वत्रोऽत्प्रेक्षितुं शक्येते ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

6. The Sangati of prasaṅga

पञ्चमाधिकरणे विधिवाक्यस्यनिरपेक्षत्वात्प्रामाण्यं
वर्णितम् ।
तस्य च वाक्यस्य शब्दार्थयोर्मध्येशब्दकोटिनिविष्टत्वात्, वाक्यप्रसङ्गे शब्दनित्यत्वं षष्ठाधिकरणे वर्ण्यत इति प्रासङ्गकी सङ्गतिः ।

7. The Sangati of introducing (upoddhāta)

सप्तमाध्यायस्य चतुर्थेपादे द्वितीयाधिकरणेन सौर्यादिविकृतिषु वैदिकमङ्गजातमुपदेष्टुं तदुपयोगित्वेन प्रथमाधिकरणे धर्मसापेक्षत्वं साधितम् तत्रप्रथमाधिकरणमुपोध्दातः ।
सेयमुत्तराधिकरणेन सह पूर्वाधिकरणस्योपाद्धातसङ्गतिः ।

8. The Sangati of exceptions (apavāda)

प्रथमाध्यायस्य तृतीयपादस्य प्रथमाधिकरणे अष्टकादिस्मृते पूर्ववत्प्राप्तं प्रामाण्यमपोद्यते, सेयमपवादसङ्गतिः ।
अनया दिशा सर्वत्र सङ्गतिरूहनीया ॥

## प्रमेयकथन

The problem of the order of chapters is now discussed :

अथाऽध्यायानां प्रमेयकथनेन सङ्गतिं प्रदर्शयिष्यामः प्रथमेऽध्याये—धर्मस्य प्रमाणम् ।
तत्र प्रथमे पादे चोदनाया :, त्रिपाद्यान्त्वर्थादमन्त्रना —मधेयस्मृत्याचाराणांवाक्यशेष सामर्थ्यश्च सन्दिग्धनिर्णये प्रमाण्यमुक्तम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

द्वितीयेऽध्याये तु—धात्वर्थभावनाऽपूर्वाणां त्रयाणामपि भेदः प्रतिपाद्यते—'भावार्थाः कर्मशब्दाः तेभ्यः क्रिया प्रतीयेतैष ह्यर्थो विधीयत'(PMS, 2,1,1) इत्यदिना ।

तृतीये तु—'अथातश्शेषलक्षणम्' 'शेषः परार्थत्वात्' (bid. 3,1,1) इत्यादिना शेषशेषिभावः प्रतिपाद्यते प्राधान्येन ।

चतुर्थे तु—क्रत्वर्थपुरुषार्थविचारेणक्वचित्फलविधिवशात्, क्वचित्साक्षात्प्रयो ज्यतैव शेषत्वफलभूता प्राधान्येन, शेषत्वं तु तदुपयोगित्वेन । तथा च—

'मानाधीना मेयसिद्धिर्मानसिद्धिस्तु लक्षणात् ।

प्रमाणमुपजीव्यत्वात्प्रथमेऽध्याय ईरितिम् ॥

मानधीनस्य धर्मस्य द्वितीये भेद उच्यते' ॥

ततश्च प्रथमद्वितीययोरध्याययोः पूर्वोत्तरभाव उपपन्नो भवति ।द्वितीयेऽध्याये कर्मणां भेदे सिद्धेभिन्नक्रि यास्वेव शेषशेषिभावो युक्तो बुभुत्सितः, नाभिन्नास्विति भेदलक्षणस्य हेतुत्वम् ।

यद्यपि 'व्रीहीनवहन्ति', 'सोमेन यजेते' त्येवमादिषु द्रव्यकर्मणां शेषशेषिभावो न कर्मभेदापेक्षः, तथापि कर्मणामपि प्रयाजाग्नेयादिना शेषशेषित्वमिहैव वक्तव्यमिति तत्सिध्यर्थं भेदलक्षणमिति बोद्धव्यम् । एवं—

तृतीये शेषशेषित्वसिद्धौ किं प्रयोज्यं किं प्रयोजकम् ।

इत्यपेक्षोदयाद्वक्ति चतुर्थे तत्प्रयुक्तये ॥

'अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासा' इति क्रत्वर्थोऽयं पुरुषार्थोऽयमिति विचारेण प्रयुक्तेर्ज्ञातुं शक्यत्वात् साक्षात्परम्परया वा प्रयुक्तिनिर्णयोपयुक्तं सर्वमिह चिन्तनीयम् ।

यद्यपि न सर्वः शेषी शेषस्य प्रयोजकः, 'पुरोडाशकपालेन तुषानुपवपती' त्यत्रतुषोपवपनं प्रति शेषः कपालं, तत्प्रयोज्यं न, तुषोपवापादेः कपालादिप्रयोजकत्वाभावात्, तथापि शेषिण एव शेषाणां प्रयोक्तार इतिभवति शेषलक्षणस्य प्रयुक्तिलक्षणं प्रति हेतुतेति युक्त एव तृतीयचतुर्थयोः पूर्वोत्तरभाव इति बोध्यम्।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

द्वितीयादित्रये प्रोक्तं भेदशेषप्रयुक्तिभिः ।
अनुष्ठेयमनुष्ठानक्रमः पञ्चम ईर्यते ॥
अनेन चतुर्थपञ्चमयोरध्याययोः पौर्वापर्यं निरूपितम् ।
द्वितीयेऽध्याये कर्मभेदनिरूपणात्पृथगनुष्ठेयत्वमवगतम् ।
तृतीयेऽध्याये शेषशेषित्वनिरूपणत् 'निवेशनस्सङ्गमन' इति मन्त्रेण (MS, 2,7,12) वह्नेरुपस्थानमनुष्ठेयम्,
न स्विन्द्रो पस्थानमित्याद्यनु ष्ठेटेयव्यवस्थाऽवगता । चतुर्थेऽध्याये प्रयुक्त्रि निरूपणादनुष्ठेयमेव निश्चीयते । पलाशशाखाच्छेदनस्य वत्सापकरणाभावे (ASS,1,1,10) सत्यप्रयेजकप्रहृत्यर्थं शाखोच्च्छेदनं न कर्तव्यमिति । एवं त्रिभिरध्यायैरनुष्ठेयस्वरूपे निश्चिते सत्यनुष्ठानक्र मस्याऽकाङ्क्षितत्वात्पञ्चमाध्याये सोऽभिधीयते 'श्रुतिलक्षणमानुपूर्व्यं तत्प्रमाणत्वात्'
(PMS, 5,1,1) इति ।
प्रयुक्तिलक्षणेस्थितः प्रयोज्यवर्गनिर्णयः।
प्रयोज्यगोचरः क्रमस्त्वतः परं निरूप्यते।।
प्रथमं तावत् श्रुतिलक्षणो वेदविहित एव क्रमः पदार्थानामाश्रयणीयः, अथ वाऽनियम इति संशये प्रयोगप्राशुभावादनियममाशङ्क्य, वेदप्रामाण्यात्तद्विहित एव क्रमस्समाश्रयणीय इति प्रसिद्धं चोदनाप्रामाण्यमेव 'वहुकृत्वोऽपि पथ्यं वदितव्यमि' त्येवं पुनः कथितमनेन
सूत्रेणेति बोध्यम् ।
अथ षष्ठारम्भः—'द्रव्याणां कर्मसंयोगे गुणत्वेनाऽ भिसम्बन्धः'। (PMS, 6,11)
भेदादिलक्षणैरेवमनुष्ठेये निरूपिते ।
कोऽनेनाऽधिक्रियेतेति साम्प्रतंसम्प्रधार्यते ॥
तदुपाद्दातरूपेण त्वादावेतद्विचार्यते ।
कर्मभिः पुरुषः कर्ता किमधिक्रियते न वा ॥
सत्यधिकारे कस्य कुत्राधिकार इति चिन्तयितुं लक्षणमारब्धव्यमिति तत्सिध्यर्थमधिकारसद्भावः
प्रथमं प्रतिपाद्यते—

CC0. In Public Domain. Digitized by Muthulakshmi Academy



'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत', 'चित्रया यजेत पशुकामः' इत्यादिषु किं पुरुषस्याधिकारः स्वाम्यं कर्मजन्यफल भोक्तृत्वमस्ति नेति चिन्त्यते।

तदर्थमिदं विचार्यते–

'अभिधाभावनामाहुरन्यामेव लिङादयः।
अर्थात्मभावना त्वन्या सर्वाख्यातेषु गम्यते' (TV, 2,1,1)॥

इति येऽयं प्रत्ययोपात्ता भावना तस्याः किं धात्वर्थ एव' भाव्यः प्रधानम्, स्वर्गादि तु साधनतया गुणभूतम् ? उत काम्यमान त्वेनोपात्तः स्वर्गादिरेव भाव्यः, तत्साधनं च धात्वर्थः? इंति।

तत्र 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेते' त्यत्रयागक्रियानि ष्पादकत्वं कर्तत्वम्, फलभोक्तृतया स्वामित्वमधिकारः।

तादृशोऽधिकारो यागकर्तुर्नास्ति।

कुतः ? फलभोगाभावात्।

तथा हि–यजेतेत्यत्राख्यातेन भावनाऽभिधीयते।

तस्याँ च धात्वर्थो भाव्यः, एकपदोपात्तत्वात्। स्वर्गस्तु पदान्तरोपात्तत्वाद्वाक्येन भाव्य तयाऽन्वेतव्यः।

तच्च वाक्यमेकपदरूपया श्रुत्या बाध्यते।

ततस्स्वर्गस्य भाव्यत्वाभावे सति गुणत्वमभ्युपेयम्। किञ्च स्वर्गशब्दो नात्र सुखवाची, किन्तु सुखसाधनं चन्दनादिद्रव्यं ब्रूते, लोके तथा व्यवहारात्।

तच्च कामयितुं योग्यम्।

तेन द्रव्येण विना यागानिष्पत्तेः।

तस्मादस्मिन्वाक्ये फलानभिधानेन तद्भोगाभावात्कर्तुर्यागे कर्तृत्वमेव, न त्वधिकार इत्यधिकारलक्षणंनारब्धव्यमिति प्राप्ते

Condusions regarding the nature of svarga and the justification for inquiry regarding the adhikāra-lakshaṇa.

आहुः (MES, 104)–'स्वर्गः साध्यो न साधनमि'ति।

स्वर्गस्य कामनाविषयत्वात्स्वर्गः साध्यो न साधनमिति स्वर्गभोक्तृत्वं कर्तुरस्ती

CC0. In Public Domain. Digitized by Muthulakshmi Academy

त्यधिकारस्य सिद्धत्वादधि कारलक्षण मारब्धव्यमित्यर्थः ।

तथा हि–यजेतेत्यत्र प्रत्ययस्य केवलमाख्यातरूपत्वमेवेति न मन्तव्यम्, किन्तु लिङ्प्रत्ययत्वेन विधिरूपत्वमप्यस्ति ।

तच्चाऽऽख्यातत्वाकारेण भावनामाचष्टे, विधित्वाकारेण पुरुषं प्रेरयति ।

पुरुषश्च स्वाभिमतफलमन्तरेण न प्रवर्तत इति तदपेक्षितं स्वर्गमेव भाव्यतया विधिरुपादत्ते ।

स्वर्गशब्दश्चोऽत्कृष्टे सुखे रूढः, द्रव्ये तु लाक्षणिकः।

तस्मात्सुखस्य भाव्यत्वं प्रबलविधिश्रुत्या सिद्धम् ।

धात्वर्थस्य तु भाव्यत्वमेकेन पदेन प्रतीयमानमपि न प्रत्ययतेनाऽवगम्यते, किन्तु प्रकृत्या ।

तथा सति स्वर्गभाव्यत्वं भावनायां प्रत्यासन्नमेकेनैवविधिरूपेणाख्यातेनावगमात्, कमियोगादपि स्वर्गस्यैव भाव्यत्वम् ।

तस्मात्फलभोगसम्भवेन कर्तुरधिकारोऽस्तीत्यधिकारलक्षणमारब्धव्यम् ।

**The nature of self (ātman) and discussion about the self, who is supposed to obtain the svarga**

(आत्मवादः)

ननु कोऽसौ कर्ता ? कथं वा तस्य स्वर्गलोकगमनम् ? कथं तस्यदुःखरूपसंसारस्य प्राप्तिः ? कथं वा तस्य निवृत्तिरिति ।

अत्रोऽच्यते–देहेन्द्रियमनोबुद्धिविलक्षणस्तत्प्रवृत्त्यनुकूलप्रयत्नवान् कर्ता ।

स च ज्ञानशक्तिः सुखदुःखाद्याश्रयो मानसाहंप्रत्ययगम्यो नित्यानुमेयो विभुर्नित्यः, प्रतिशरीरं भिन्नश्चात्म ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

तं च त्रेधा सत्यः प्रपञ्चो बध्नाति–भेगायतनं शरीरम्, भोगसाधनानीन्द्रि याणि, भोग्याश्शब्दादयो विषयाः ।

भोगस्तु सुखदुःखान्यतरसाक्षात्कारः ।

## आत्मवादः

The nature of liberation (moksha)

त्रिविधस्यापि बन्धस्याऽत्यन्तिको विलयो मोक्षः ।

स्वर्गगमनं तु तस्यौपाधिकम् ।

न च शक्यते तस्य कापिलवदकर्तृत्वं वक्तुम्, श्रुत्यदिविरोधात्।

यथा हि–सर्वत्र हि कर्तृभोक्तृशब्दयोस्सा मानाधिकरण्यं दृश्यते ।

यथा अत्रैव 'यजमानः स्वर्गलोकं याती'ति ।

तथा 'एवं विद्वानग्निं चिनुते ऋध्नोत्येव, य एवं विद्वान् द्विरात्रेण यजते स्वर्गमेव लोकमेती' ति ।

तथोपनिषत्स्वपि 'सङ्कल्पादेवास्य पितरस्समुपतिष्ठन्ती' ति (CHU 8,2,1) कर्त्रभिधा यिन्या षष्ठ्या आत्मनस्सङ्कल्पं प्रति कर्तृत्वमुक्तम् ।

सम्भवति च सर्वगतस्याऽऽत्मनोयागज्ञान प्रयत्नसङ्कल्पदिषु साक्षादेव कर्तृत्वम् ।

न हि वयं स्पन्दमेव क्रियामभ्युपग च्छामो वैशेषिकवत्, येन आत्मनः कर्तृत्वं न स्यात्, धात्वर्थमात्र क्रियात्वात् ।

स्पन्देष्वपि प्रयोजकत्वेनास्यैव प्रयोक्तृत्वं सम्भवति ।

प्रयत्नेन ह्यसौ शरीरं स्पन्दे प्रयोजयति, साक्षात्तु न सम्भवति सर्वगते स्पन्दस्या भावात् इत्यनेनाभिप्रायेणोऽ पनिषत्सु पुराणेषु चाऽकर्तृत्ववादः ।

ज्ञातृविषयस्तावदहंप्रत्यय इति सर्वाविवादम्।

सर्वोऽपि आत्मनोऽहमिति परामृशति, परस्त्विदमिति ।

मामहं जानमि सर्वश्चेदं भूतंभवद्भवि ष्यद्विशेषतो न जानामि, अहमस्मि, नाहम स्मीति सर्वदाऽहंत्वेनैवाऽत्मनः प्रतीतिः ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

तेन निस्संशयस्य नित्यस्य स्वतन्त्रज्ञान शक्तेरेवज्ञातृत्वम् ।

बुध्यादीनान्तु तत्संसृष्टानामेकत्व भ्रान्त्या सामानाधिकरण्य प्रतीतीरुष्णतोयप्र तीवत् भास्वरायः पिण्डप्रतीतिवच्च ।

तथा चाहुः (CSV ātma-vāda)

'साक्षाद्यद्यपि सम्बन्धो नाऽत्मनो यज्ञसाधनैः ।

तथाऽपि लक्षणवृत्त्या शरीरंद्वारको भवेत् ॥

प्रत्यक्षत्वं च देहस्थं भाक्तंमात्मनि कल्पितम् ।

आत्मनस्स्वर्गयानं वा शरीरस्योऽपचर्यते॥

न च विज्ञानमात्रत्वे कर्तृभोक्तृत्वसम्भवः ।

शरीरविनिपाताच्च परं नाऽन्यद्यदेष्यते ॥

अदत्तफल इष्ट्यादौ तदा तद्वचनं मृषा ।

तस्माद्वेदप्रमाणार्थमात्माऽत्र प्रतिपाद्यते ॥

यद्यपि प्रकृतं वाक्यं व्याख्यायेताऽर्थवादतः ।

शरीरोन्द्रियबुद्धिभ्यो व्यतिरिक्तत्वमात्मनः ॥

नित्यत्वं शिष्यते शेषं शरीरादि विनाशि चे' ति ॥

तत्सिद्धं यथाप्रतिज्ञात एवाऽऽत्मेति ।

स च पुनस्संसारे दुःखबहुलेऽभिनिवेशाज्ञानाविधानि शरीराणिस्थावरजङ्गमात्मकानि धर्माधर्मनि मित्तकानि पुनः पुनरनाद्यज्ञानवशात् प्राप्नोति, न कदाचिद्विमुच्यते कर्म. बन्धात् ।

विनश्वरोऽप्ययं संसारः प्रवाहरूपेण सदा तिष्ठति, न कदाचिदनादृशं जगत् ।

स कदाचित्पुण्ययोगाद्दिव्यं शरीरादि संप्राप्य दिव्यविषयजन्यमनित्यंसुखमनुभवन् कृतार्थमिवात्मानं मन्यते, तथापि तद्दुःखमेव विवेकिनाम् ।



16

Discussion about the distinction between mundane happines and svarga :

CC0. In Public Domain. Digitized by Muthulakshmi Academy



तथा चोक्तम् (SD,1,1,5)

'संसारे स्वर्गसंज्ञं यत्सुखं तदपि सूरयः ।
वहुप्रयाससाध्यत्वात्दुःखमेवाऽ नुजानते ॥
जन्ममृत्युजराव्याधिदुःखान्यनुदिनं नृणाम् ।
स्वयमेव विना यत्नान्निपतन्ति सहस्रशः ॥
वहुदुःखपरिष्वक्तं यन्नाम स्वल्पकं सुखम् ।
सुरापानादिसुखवद्वर्जनीयं विवेकिनाम् ॥
एवं भूतेऽपि संसारे ये रक्ताः सुखतृष्णया ।
न तेषामधिकारोऽस्ति मुक्तिशास्त्रे कथञ्चन ॥
संसारादुद्विजन्ते ये गत्वा दुःखमिदं सदा ।
त एव खलु मुच्यन्ते न तु यः प्राकृतो जनः ॥ तेषामेवाऽप वर्गाख्यः पुरूषार्थो महात्मनाम् ।
सुखदुःखोपभेगो हि संसार इति शब्द्यते ॥
तयोरनुपभोगं तु मोक्षं मोक्षविदो विदुः ।
श्रुतिरप्येतगेवाऽऽभेदं संसारमोक्षयो : ॥
न ह वै सशरीरस्य प्रियाप्रियविहीनता ।
अशरीरं वा व सन्तं स्पृशतो न प्रियाप्रिये ॥
आनन्दात्मानं ये वदन्ति स्वयंप्रभम् ।
तन्मतेपि च संसारान्मुक्तेरेतावती भिदा ॥
आत्मा ह्यानन्दरूपोऽसौ संसारेऽपि प्रकाशते ।
तावानेव स मोक्षेऽपि नाधिक्यं तस्य किञ्चन ॥
तेन शव्दादिविषयजन्ययोस्सु खदुःखयोः ।
निवृत्तिरेव संसारादपवर्ग इति स्थितिः ॥
केचिन्नित्यसुखव्यक्तिं व्रह्मोपास्त्यैव सर्वदा ।
मन्यन्ते परमां मुक्तिं मनसा विभुना सह ॥
तत्वज्ञानाद्भवेन्मोक्षोनित्योऽसौसर्वसम्मतः।
सुखदुःखविहीनस्तु मुक्तस्स्वस्थोऽवतिष्ठते'' इति ॥

किमिदं स्वस्थ इति ? शृणु ये ह्यागमापायिनो धर्मा बुद्धिसुख दुःखेच्छाद्वेष प्रयत्नधर्माधर्मसंस्कार स्तानपहाय यदस्य स्वं नैजं रूपं ज्ञानशक्तिसत्ताद्रव्यविभुत्वादि तस्मिन्नेव सदाऽवतिष्ठन्त इत्यर्थः । तत्वज्ञानंत्वौपनिषदात्मज्ञानमेव । ततोऽज्ञानवशात्सुखदुःखादिस मस्तवैशेषिकात्मगुणोच्छेदो मोक्षः ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

सुखदुःखयोरुच्छेदस्तु धर्माधर्मयोरुच्छेदात्, तदुच्छेदस्तु प्रप्तानां धर्माधर्माणां भोगेन नैमित्तिककर्मानुष्ठानेन आत्मज्ञानेन च विरोधात्, उत्पाद्यानान्तु काम्यकर्मानुष्ठानेन आत्मज्ञानेन च विरोधात्, उत्पाद्यानान्तु काम्य कर्माकरणदेवासम्भवात् ।

विहिताकरणप्रतिषिद्धाचरननिमित्तकानां तु तत्करणाकरणपरिहारादसतिशरीरम्भके पूर्व शरीरनिपाते चाऽशरीरो मुक्तोऽवस्थितो भवात ।

**The two-fold purposes of Knowledge of self : kratvartha and purushārtha**

अत्रैदं तत्त्वं बोध्यम्—द्विविधं ह्यात्मज्ञानं क्रत्वर्थं पुरूषार्थं चेति । कुतः ? संयोग भेदात् । तथा हि 'यत्तावदविनाशी वा अरेऽयमात्मा' इत्यादिना शरीराद्यतिरिक्तनित्यात्म स्वरूप सद्भावज्ञानम्, तत्पारलौकिकफलक कर्मानुष्ठानौपयिकत्वात्क र्मज्ञानवदेव सामर्थ्यतः क्रतुसंयेगात् क्रत्वर्थम् ।

यानि पुनरितिकर्तव्यताविशेषयु क्तान्युपासनात्मकानि ज्ञानानि विधीयन्ते, यच्चपुनरात्मसद्भावोऽपक्रमेविधिसरूप वाक्येन 'आत्मा वा अरे द्रष्टव्य' (BrU, 2,4,5) इत्यादिनाऽऽत्मदशनमु द्दिश्य श्रवणादि विधीयते, तेषां क्रतौदृष्टोपयोगाभावात्प्र वृत्तिविरूद्धत्वाच्चा दृष्टमेव फलं युक्तम् ।

तच्च वाक्यशेषाद्विविधम्—अभ्युदयरूपं निःश्रेयसरूपं च ।

तत्र 'सर्वान्कामानवाप्नोती' त्यद्यभ्युदय फलम्, 'तरति शोकमात्मवित् न स पुनरावर्तत' इति निश्रेयसफलमिति सर्वं शिवम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

CC0. In Public Domain. Digitized by Muthulakshmi Academy

CC0. In Public Domain. Digitized by Muthulakshmi Academy

English books by S. K. Ramachandra Rao (available reprints)

The Three Acharyas – Sankara, Ramanuja and Madhva (a compilation of articles)
68 pages, Rs. 40
The Teachings of the Buddha (articles on Buddhism published in 'The Aryan Path')
117 pages, Rs. 85
Temples: Icons and Rituals (comprising of 'Icons and Images in Indian Temples' and 'Temple Rituals') 167 pages, Rs. 100
Jainism in South India 130 pages, Rs. 85
Adhyatma rasa ranjani (A translation of the text by Vishnutirtha, Adavi Acharya)
26 pages, Rs. 20
The Hill Shrine of Tirupati (A comprehensive account of the history of the shrine, the evolution of the temple complex, and the mode of worship)
260 pages, Rs. 200
The Saint of Sringeri (A translation of 'sarada peethada manikya' by Sri S. A. Karthik)
Rs. 200
Writings of Sankara's Advaita (comprising 'jeevanmukti in advaita', 'consciousness in advaita', and 'Sankara -a psychological study' plus the articles 'the psychological standpoint of Sankara', and 'psychological speculations of Sankara')
372 pages, Rs. 300
Development of Psychological Thought in India & Elements of Early Buddhist Psychology
250 pages, Rs. 400
Social Institutions among the Hindus and other related writings
116 pages, Rs. 200
Origins of Indian Thought and other writings
220 pages, Rs. 350
The Essence of the Bhagavad Gita (Aphorisms composed by the author that highlight the teaching of the Gita)
286 pages, Rs. 350
Writings on Buddhism (comprising 'Buddha and the dharma' and 'Buddha's first discourse' and the articles 'telakathaha gatha' and 'sumangala gatha')
166 pages, Rs. 200
The Message of the Bhagavad Gita (300 important verses and their meaning, complemented by various commentaries)
310 pages, Rs. 350
The Indian temple: Its meaning (The structure and symbolism of the temple)
152 pages, Rs. 250
The Enlightenment of Ashtavakra (Translation and excerpts from 'tripura rahasya')
145 pages, Rs. 200
Pratima Kosha (The Encyclopedia of Indian Iconography)
6 Volumes (ebook), Rs. 700
Rgveda Darshana (A traditional interpretation in English)
13 volumes, Rs. 6000
Salagrama Kosha (Their significance in hindu tradition)
2 volumes, Rs. 2000

Website

Price: Rs. 6000 | ISBN: 978-93-84069-15-5 (set)
Prof. S. K. Ramachandra Rao Memorial Trust®
305, 6th Cross, 1st Block, Jayanagar Bangalore 560 011 Ph: 080 2656 3957